॥ परिभाषेन्दुशेखरः ॥

(Under the Project of Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text)

Chief Director

Prof. Radha Vallabh Tripathi

Vice Chancellor

Rashtriya Sanskrit Sansthan, Deemed University, New Delhi

Director

Prof. Azad Mishra

Principal, Rashtriya Sanskrit Sansthan, Bhopal Campus

National Co-ordinator

Dr. Shukla Mukhrjee

Project Officer

Editor & Proof Reader

Dr. Pradeep Kumar Pandey

Graphics & Typed by

Sonraj Patidar

R.S.K.S. Bhopal Campus

परिभाषेन्दुशेखरः

सर्वतन्त्रस्वतन्त्र- श्रीनागोजीभट्टविरचितः

म.म.कै. तात्याशास्त्रिणा कृतेन
भूति-तिलकेन विभूषितः

वाराणसेय-राजकीय-संस्कृत-महाविद्यालयभूतपूर्व-प्रधानाध्यापकेन
वैयाकरणप्रवरेण 'मोकाटे'- इत्युपनामक-श्रीगणपति-
शास्त्रिणा निर्मितया 'तत्त्वप्रकाशिका'ख्यया
भूतिव्याख्यया समलङ्कृतः

काशिक श्रीस्याद्वादमहाविद्यालय-साहित्यविभागाध्यक्षेण
वैजापुरकरोपान्ह्व-श्रीनरहरिशास्त्रितनुजनुषा एम. ए.-
न्याय-वेदान्त-साहित्याचार्येण राष्ट्रपतिपुरस्कृतेन
श्रीगोविन्दशर्मणा 'परिभाषेन्दु-पीयूषा'ख्य
शोधपत्रेण सह सम्पादितः

श्रीतात्याशास्त्रिणां पौत्रेण पटवर्धनोपनामक-
श्रीवासुदेवशास्त्रिणा प्रकाशितः

ग्रन्थनाम- परिभाषेन्दुशेखरः

ग्रन्थकर्ता- श्री नागोजी भट्ट
प्रकाशन- चौखम्बा संस्कृत संस्थान वाराणसी
प्रकाशन सम्वत 2039 वै.
प्रकाशक- वासुदेव बालकृष्ण पटवर्धन
राजराजेश्वरी प्रेस-पुस्तकालय दुर्गाघाट, वाराणसी

(अस्य पुस्तकस्य पुनर्मुद्रणादिरूपाः सर्वेऽप्यधिकाराः
प्रकाशकेन स्वायत्तीकृताः)

R.Sk.S. Bhopal Campus

नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः।
बालानां सुखबोधाय परिभाषेन्दुशेखरम॥

प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषारुपाणि तानि व्याख्यायन्ते। अथ शास्त्रत्वसम्पादनोद्देशनामकं प्रथमं प्रकरणम॥

ननु लण्-अइउण्-सूत्रयोर्णकारद्वयस्यैवोपादानेनाणिण्ग्रहणेषु सन्देहादनिर्णयोऽत आह-

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम॥1॥

विशेषस्यान्यतराद्यर्थरूपस्य व्याख्यानाच्छिष्टकृतात॥ प्रतिपत्तिर्निश्चयो यतः सन्देहाच्छास्त्रमलक्षणमननुष्ठापकं लक्षणमलक्षणं तथा न, शास्त्रस्य निर्णयजनकत्वौचित्यादित्यर्थः। असन्दिग्धानुष्ठानसिद्धद्ध्यर्थेऽत्र शास्त्रे सन्दिग्धोच्चारणरूपाचार्यव्यवहारेण सन्देहनिवृत्तेर्व्याख्यानातिरिक्त-निमित्तानपेक्षत्वं बोध्यत इति यावत॥ तेन अणुदित्सवर्णस्येत्येतत्परिहाय पूर्वेणाण्ग्रहणं, परेणेण्ग्रहणमिति लण्सूत्रे भाष्ये स्पष्टम॥1॥

तत्र संज्ञापरिभाषाविषये पक्षद्वयमित्याह-

यथोद्देशं संज्ञापरिभाषम॥2॥
कार्यकालं संज्ञापरिभाषम॥3॥

उद्देशमनतिक्रम्य यथोद्देशम॥ उद्देश उपदेशदेशः। अधिकरणसाधनश्चायम॥ यत्र देश उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतशक्तया गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रे व्यवहारः। देशश्चोच्चारणकाल एवात्र शास्त्रे व्यवहियते। तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तुष्यद्यथाश्रुतग्राहिप्रतिपत्रपेक्षोऽयं पक्ष इति ईदूत (1-1-11) सूत्रे कैयटः।

केचित्तु-परिभाषाविषये तस्मिन (1-1-66) इत्यादिवाक्यार्थबोधे सप्तमीनिर्देशादिः क्व इति पर्यालोचनायां सकलतत्तद्विध्युपस्थितौ सकलतत्तत्संस्काराय गुणभेदं परिकल्प्यैकवाक्यतयैव नियमः। कार्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः। एतदेवाभिप्रेत्याधिकारो नाम त्रिप्रकारः कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति षष्ठी स्थाने (1-1-49) इति सूत्रे भाष्य उक्तम॥ अधिकारशब्देन पारार्थ्यात्परिभाषाप्युच्यते। कश्चित॥परिभाषारुप इति कैयटः।

B.Sr.S. Bhopal Campus

दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशक एवमेतत स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तत्तात्पर्यम एतच्च पक्षद्वयसाधारणं भाष्यम, पक्षद्वयेपि प्रदेशैकवाक्यताया इतः प्रतीतेः।

तत्रैतावान विशेषः – यथोद्देशे परिभाषादेशे सर्वविधिसूत्रबुद्धावात्मभेदं परिकल्प्य तैरेकवाक्यता परिभाषाणाम। तदुक्तं क्ति च (1-1-5) इति सूत्रे कैयटे – यथोद्देशे प्रधानान्यत्मसंस्काराय सन्निधीयमानानि गुणभेदं प्रयुञ्जत इति। कार्यकाले तु तत्तद्विधिप्रदेशे परिभाषाबुद्धयैकवाक्यतेति। अत्रैकदेशस्थ इत्यनेन तत्र तत्र तद्बुद्धावपि तत्तद्देशस्थत्वं वारयति, यथा व्यवहर्तृणां कार्यार्थमनेकदेशगमनेऽपि न तत्तद्देशीयत्वव्यवहारः किन्त्वभिजनदेशीयत्वव्यवहार एव, तन्निषेधवाक्यानामपि निषेध्यविशेषाकाङ्क्षत्वाद्विध्येकवाक्यतयैवान्वय इति परिभाषासादृश्यात परिभाषात्वेन व्यवहारः क्ति च (1-1-5) इत्यत्र भाष्ये। तत्रैकवाक्यता पर्युदासन्यायेन। प्रसज्यप्रतिषेधेऽपि तेन सह वाक्यार्थबोधमात्रेणैकवाक्यताव्यवहारः।

संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः, किन्तु प्रदेशवाक्येन सहैव। अतएव अणोऽप्रगृह्यस्य (8-4-57) इत्येतदेकवाक्यतापन्नादसो मात (1-1-12) इत्येतत प्रति न मुत्वाद्यसिद्धम, असिद्धत्वस्य कार्यार्थतया कार्यज्ञानोत्तरमेव तत्प्रवृत्तिः, कार्यज्ञानं च प्रदेशदेश एवेति तद्देशस्थस्यासिद्धत्वात पूर्वग्रहणेनाग्रहणात, एवं तद्बोधोत्तरमेव विरोधप्रतिसन्धानं चेति तत्रत्यपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम। अतएव कार्यकालपक्षे अयादिभ्यः परैव प्रगृह्यसंज्ञा इति अदसो मात (1-1-12) इति सूत्रे भाष्य उक्तम।

आकडाराधिकारस्थभपदसंज्ञादिविषये तु यथोद्देशपक्ष एवेति तत्रत्यपरत्वेनैव बाध्यबाधकभावः। पदादिसंज्ञानां तत्र जातशक्तिग्रहेणैव त्रिपाद्यामपि व्यवहारः। अत एव पूर्वत्रासिद्धम (8-2-1) इति सूत्रे परिभाषाणामेव त्रिपाद्यामप्रवृत्तिमाशङ्कक्य कार्यकालपक्षाश्रयेण समाहितमित्याहुः। यथोद्देशपक्षः प्रगृह्यसंज्ञाप्रकरणे भाष्ये ॥2॥

कार्यकालमित्यस्य च कार्य्येण काल्यते स्वसन्निधिं प्राप्यत इत्यर्थः। कार्येण स्वसंस्काराय स्ववृत्तिलिङ्गचिह्नितपरिभाषाणामाक्षेप इति यावत। अतएव पूर्वत्रासिद्धम (8-2-1) इति सूत्रे भाष्ये त्रिपाद्या असिद्धत्वात्तत्र सपादसप्ताध्यायीस्थपरिभाषाणामप्रवृत्तिमाशङ्क्य यद्यपीदं तत्रासिद्धं तत्त्विह सिद्धमित्युक्त्वा तावताप्यसिद्धिरित्यभिप्रायके कथमिति प्रश्नेकार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तम।

न च कार्यकालपक्षे मो ह्रस्वात (8-3-32) इत्यादौ तस्मादित्युत्तरस्य (1-1-67), तस्मिन्निति निर्दिष्टे पूर्वस्य (1-1-66) इति परिभाषाद्वयोपस्थितौ परत्वाद् उभयनिर्देशे पञ्चमीनिर्देशो बलीयान इति तस्मिन्निति सूत्रस्थभाष्यासङ्गतिः, उभयोरेकदेशस्थत्वेन

परत्वादित्यस्यासङ्गत्यापत्ते स्पष्टं चेदम इको गुण (1-1-3) इत्यत्र कैयट इति वाच्यम, विप्रतिषेधसूत्रेऽष्टाध्यायीपाठकृतपरत्वस्याश्रयणेनादोषात। न हि कार्य्यकालपक्ष इत्येतावता तदपैति, पक्षद्वयेपि प्रदेशेषु स्वबुद्धिजननेनाविशेषात। नहि तत्पक्षेऽप्यचेतनस्य शास्त्रस्य स्वदेशं विहाय तद्देशगमनं सम्भवति। नाप्यस्मदादिबुद्धिजननेन स्वदेशत्यागो भवति।

अत एव भाष्ये एकदेशस्थस्यैव सर्वशास्त्राभिज्वालकत्वमुक्तम। अत एव तस्मिन्निति सूत्रे कैयटः – सूत्रपाठापेक्षया परत्वस्य व्यवस्थापकत्वमिति। 'इको गुण' इति सूत्रस्थकैयटस्तु चिन्त्य एव अन्यथा सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूपैकदेशस्थत्वेन क्वापि परत्वं न स्यात। किञ्च 'कि ति च' इति सूत्रस्थकैयटरीत्या विधिसूत्राणां यथोद्देशपक्षे परिभाषादेशे सन्निधानेन तेषां परत्वं व्याहन्येत। एवं च वृक्षेभ्य इत्यत्र 'सुपि च' (7-3-102) इत्यतः परत्वाद् 'बहुवचने झल्येत' (7-3-103) इत्येत्त्वमित्याद्युच्छिद्येतेत्यलम ॥3॥

इत्संज्ञका अनुबन्धास्तेष्वयवानवयवत्वसन्देह आह-

अनेकान्ता अनुबन्धा इति ॥4॥

अनेकान्ता अनवयवा इत्यर्थः। यो ह्यवयवः स कदाचित क्वचित्रोपलभ्यत एव, अयं तु न तथा, तदर्थभूते विधेये कदाप्यदर्शनात।

शित्किदित्यादौ समीपेऽवयवत्वारोपेण समासो बोध्यः। वुञ्छण्कठ (4-2-80) इत्यादौ णित्त्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादि तु व्याख्यानतो निर्णेयम। हलन्त्यम (1-3-3) इत्यत्रान्त्यशब्दः परसमीपबोधकः ॥5॥

वस्तुतस्तु- एकान्ताः॥6॥ इत्येव न्याय्यम,

शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च। अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम। एवं हि बहुव्रीहिरपि न्यायत एवोपपन्नः, अन्त्यादिशब्दे लक्षणा च न। किञ्चानवयवत्वे णशकप्रत्ययादौ णादेरित्त्वानापत्तिः, प्रत्ययादित्वाभावात। दघ्नचश्चकारकस्य वैयर्थ्यापत्तिश्च। इदं च तस्य लोपः (1-3-9) इत्यत्र भाष्ये स्पष्टम। तत्र ह्युक्तम एकान्ता अनुबंधाः इत्येव न्याय्यमिति दिक॥5॥

नन्वेकान्तत्वेऽनेकाल्त्वादेव औशादीनां सर्वादेशत्वसिद्धया अनेकाल (1-1-55) सूत्रे शिद्ग्रहणं व्यर्थमत आह –

नानुबंधकृतमनेकाल्त्वम ॥6॥

शिद्ग्रहणमेवैतज्ज्ञापकम। तेनार्वणस्तृ (6-4-127) इत्यादेर्न सर्वादेशत्वम। डादिविषये तु सर्वादेशत्वं विनानुबन्धत्वस्यैवाभावेनानुपूर्व्यात्सिद्धम ॥6॥

RSKS Bhopal Campus

नन्वैवमप्यवदातं मुखमित्यत्र पलोपोत्तरमात्वे कृतेऽदाप् (1-1-20) इति घुसंज्ञाप्रतिषेधो न स्याद् दैपः पकारसत्त्वेनेजन्तत्वादात्वाप्राप्त्या पलोपोत्तरं पकाराभावेनास्य दास्वाभावादत आह-

नानुबन्धकृतमनेजन्तत्वम् ॥7॥

उदीचां माङः (3-4-19) इति निर्देशोऽस्या ज्ञापकः। आदेच उपदेशे (6-1-45) इति सूत्रेणोपदिश्यमानस्यैजन्तस्यात्त्वं क्रियते, ङकारसत्त्वे त्वेजन्तत्वाभावादात्त्वाप्राप्तेस्तस्यासङ्गतिः। न चास्यामवस्थायां तस्य धातुत्वाभावात्कथमात्त्वम् (इति वाच्यम) तत्र धातोः(6-1-8) इत्यस्य निवृत्तेरित्यन्यत्र विस्तरः। स्पष्टं चेदं दाधा घ्वदाप् (1-1-20) इति सूत्रे भाष्ये॥7॥

नन्वेवमपि वाऽसरूपः (3-1-94) इति सूत्रेण क-विषयेऽणोप्यापत्तिरित्यत आह-

नानुबन्धकृतमसारूप्यम् ॥8॥

ददातिदधात्योर्विभाषा (3-1-139) इति ण-बाधक-शस्य विकल्पविधायकमस्यां ज्ञापकम् तेन 'गोद' इत्यादौ नाणिति वासरूपसूत्रे भाष्ये स्पष्टम् ॥8॥

ननु संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात्, प्रकरणस्याभिधानियामकत्वसिद्धात् कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति न्यायात् अस्ति च प्रकृते बह्वादीनां संख्यासंज्ञा कृतेति ज्ञानरूपं प्रकरणम्, न तु लोकप्रसिद्धैकद्व्यादीनामित्यत आह –

उभयगतिरिह भवति ॥9॥

इह शास्त्रे। संख्याया अतिशदन्तायाः (5-1-22) इति निषेधोऽस्या ज्ञापकः। न हि कृत्रिमा संख्या त्यन्ता शदन्ता वास्ति, तेन कर्तरि कर्मव्यतिहारे- (1-3-14), कण्वमेघेभ्यः करणे (3-1-17) विप्रतिषिद्धं चानधिकरणे (2-4-13) इत्यादौ लौकिकक्रियाद्रव्याद्यवगतिः। तत्र क्वोभयगतिः क्वाकृत्रिमस्यैव क्व कृत्रिमस्यैवेत्यत्र लक्ष्यानुसारिव्याख्यानमेव शरणम् अतएवाऽऽम्रेडितशब्देन कृत्रिमस्यैव ग्रहणं न तु द्विस्त्रिर्घुष्टमात्रस्य। स्पष्टं चेदं संख्यासंज्ञासूत्रे भाष्ये।

यत्तु संज्ञाशास्त्राणां मच्छास्त्रेऽनेन शब्देनैत एवेति नियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीजमिति। तन्न तेषामगृहीतशक्तिग्राहकत्वेन विधित्वे सम्भवति नियमत्वायोगात् सर्वे सर्वार्थवाचकाः इत्यभ्युपगमोऽपि योगिदृष्टया, न त्वस्मददृष्ट्या, विशिष्य सर्वशब्दार्थज्ञानस्याशक्यत्वात्, सामान्यज्ञानं तु न बोधोपयोगीत्यन्यत्र निरूपितम् ॥9॥

नन्वध्येता शायितेत्यादाविङ्शीङोर्गुणत्वाद् गुणनिषेधः स्यादत आह-

कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ॥10॥

R.S.S. Bhopal Campus

स्थण्डिलाच्छयितरि व्रते (4-2-15) इति निर्देशश्चास्या ज्ञापकः। ऊर्णुनविषतीत्यादिसिद्धये कार्यमनुभवन्निति। अत्र हि- द्विर्वचनेऽचि (1-1-59) इति नुशब्दस्य द्वित्वम्, अन्यथा सन्यङोः (6-1-9) इत्यस्य षष्ठयन्तत्वात्सन्नन्तस्य कार्यित्वेन इसो द्वित्वनिमित्तत्वाभावात ङित्प्रवृत्तिर्न स्यात।

वस्तुतः समवायिकारणनिमित्तकारणयोर्भेदस्य सकललोकतन्त्र-प्रसिद्धतया तस्य तत्त्वेनाश्रयणाभावेन नैषा ज्ञापकसाध्या। अत एव हिः प्रयुक्तः। स हि तत्त्वेनानाश्रयणे हेतोः प्रसिद्धत्वं द्योतयतीति तत्त्वम।द्विर्वचनेऽचि (1-1-59) इत्यत्र भाष्ये ध्वनितैषा ॥10॥

ननु प्रणिदापयतीत्यादौ दारूपस्य विधीयमाना घुसंज्ञा दापेर्न स्यादत आह-

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥11॥

यमुद्दिश्यागमो विहितः स तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितोऽतस्तद्ग्रहणेन तद्ग्राहकेण तद्बोधकेन शब्देन गृह्यते बोध्यत इत्यर्थः। तत्र तद्गुणीभूता इत्यंशो बीजकथनम।लोकेऽपि देवदत्तस्याङ्गधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते।

यमुद्दिश्य विहित इत्युक्तेः प्रनिदारयतीत्यादौ न दारित्यस्य घुत्वम।आने मुक (7-2-82) इति मुग्विधानसामर्थ्यादेषाऽनित्या, अन्यथा पचमानः इत्यादावकारस्य मुकि, अनया परिभाषया विशिष्टस्य सवर्णदीर्घे तद्वैयर्थ्यं स्पष्टमेव। तेन दिदीय इत्यादौ यणादि न, जहार इत्यादौ 'आत औ णलः' (7-1-34) इति च न। न चाकारादेर्वर्णस्य वर्णान्तरमवयवः कथमिति वाच्यम्,वचनेनावयवत्वबोधनात। तस्य चावयवत्वसादृश्ये पर्यवसानं बोध्यम।

न चोक्तज्ञापकाद्वर्णग्रहणेऽस्या अप्रवृत्तिरिति वाच्यम्,आने मुक(7-2-82) इति सूत्रे भाष्येऽकारस्याङ्गावयवस्य मुगित्यर्थे पचमान इत्यत्र तास्यनुदात्तेत(6-1-183) इति स्वरो न स्यादित्याशङ्क्यादुपदेशभक्तस्तद्ग्रहणेन ग्राहीष्यत इत्युक्तेरसङ्गत्यापत्तेः।

किञ्च मन्तपदावयवस्य ह्रस्वात्परस्य मो मुडित्यर्थे कुर्वन्नास्त इत्यादौ मो मुडागमे णत्वप्राप्तिमाशङ्क्य यदागमा इति न्यायेनाऽऽद्यनस्यापि पदान्तग्रहणेन ग्रहणात। पदान्तस्य (8-4-37) इति निषेध इत्यनया परिभाषयाऽऽगमानामागमिधर्मवैशिष्ट्यमपि बोध्यत इत्याशयक मुट् (8-3-32) सूत्रस्थभाष्यासङ्गतेः।

किञ्च गुणादे रपरत्वे रेफविशिष्टे गुणत्वाद्येष्टव्यम। अन्यथा ऋकारस्य गुणवृद्धी अरारावेवेति नियमो न स्यात। तच्च वर्णग्रहणे एतदप्रवृत्तौ न सङ्गच्छते। अत एव रदाभ्याम। (8-2-42) इति सूत्रे भाष्यम। 'गुणो' भवति, वृद्धिर्भवति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्त्तत इति।

R.S.S. Bhopal Campus

अतएव नेटि (7-2-4), णेरनिटि (6-4-51) इत्यादि चरितार्थम। अनागमकानां सागमका आदेशा इत्यस्य त्वयमर्थः-आर्द्धधातुकस्येडागम इत्यर्थे ज्ञाते नित्येषु शब्देष्वागमविधानानुपपत्त्याऽर्थापत्तिमूलक-वाक्यान्तरकल्पनेनेड्हितबुद्धिप्रसङ्गे सेड्बुद्धिः कर्त्तव्येति। एवञ्चाऽऽदेशेष्विवात्रापि बुद्धिविपरिणाम इति न नित्यत्वहानिः।

स्थानिवत्सूत्रे च नेदृशादेशग्रहणम्, साक्षादष्टाध्यायीबोधितस्थान्यादेशभावे चरितार्थ्यात। किञ्चैवं सति स्थानिबुद्ध्यैव कार्यप्रवृत्त्या निर्द्दिश्यमानस्य इति परिभाषाया अप्राप्याऽडागमसहितस्य पिबाद्यादेशापत्त्या लावस्थायामडिति भाष्योक्तसिद्धान्तासङ्गतिः। स्थानिवद्भावविषये निर्दिश्यमानस्य इति परिभाषायाः प्रवृत्तौ तिसृणामित्यत्र परत्वात्तिस्त्रादेशे स्थानिवद्भावेन त्रयोदेशमाशङ्क्य सकृद्गति न्यायेन समाधानपरभाष्यासङ्गतिः।

एरुः (3-4-86) इत्यादौ स्थानषष्ठीनिर्देशात्तदन्तपरतया पठितवाक्यस्यैव समुदायादेशपरत्वेनादेशग्रहणसामर्थ्यात्तस्य स्थानिवत्सूत्रग्रहणेन न दोषः। आनुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य न त्याग इति अचः परस्मिन (1-1-57) इत्यादेर्नासङ्गतिः।

एतेन यदागमा इति परिभाषा स्थानिवत्सूत्रेण गतार्थेत्यपास्तम। एतत्सर्वं दाधाघ्वदाप (1-1-20) इति सूत्रे भाष्ये स्पष्टम ॥11॥

नन्वेवमुदस्थादित्यादौ उदःस्थास्तम्भोः पूर्वस्य (8-4-61) इति पूर्वसवर्णापत्तिरत आह –

निर्दिश्यमानस्यादेशा भवन्ति ॥12॥

षष्ठी स्थानेयोगा (1-1-49) इति सूत्रमावर्त्तते। तत्र द्वितीयस्यायमर्थः – षष्ठयन्तं निर्दिश्यमानमुच्चार्यमाणमुच्चार्यमाणसजातीयमेव निर्दिश्यमानावयवरुपमेव वा स्थानेन स्थाननिरुपितसम्बन्धेन युज्यते, न तु प्रतीयमानमित्यर्थस्तेनेदं सिद्धम।

न चास्य च्वौ (7-4-32) इत्यादौ दीर्घाणामादेशानापत्तिः, तेषां निर्दिश्यमानत्वाभावादिति वाच्यम, जातिपक्षे दोषाभावात। किञ्च न भूसुधियोः (6-4-85) इति निषेधेन ग्रहणकशास्त्रगृहीतानां निर्दिश्यमानकार्यबोधनान्न दोषः। इयङुवङौ ित्त्वं त्विवर्णोवर्णान्तश्नुधातुभ्रुवामित्यर्थेन धात्वादीनामपि निर्दिष्टत्वादन्त्यादेशत्वाय। रीङृ्ोर्ि त्त्वं तु स्पष्टार्थमेव। एतेनेदं ि त्त्वं वर्णग्रहणे निर्दिश्यमानपरिभाषाया अप्रवृत्तिज्ञापकमित्यपास्तम। हयवरट् सूत्रस्थेन अयोगवाहानामुपदेशेऽलोऽन्त्यविधिः प्रयोजनम। वृक्षस्तत्र नैतदस्ति प्रयोजनं निर्दिश्यमानस्येत्येव सिद्धमिति भाष्येण विरोधात।

अनया परिभाषया येन विधिः (1-1-72) इति सूत्रबोधिततदन्तस्य स्थानित्वाभावबोधनं यदागमा इति लब्धस्य च, तेन सुपद, उदास्थादित्यादिसिद्धिः।

अनया च स्वस्वनिमित्तसन्निधापितानाम अलोऽन्त्यस्य (1-1-52) इत्यादीनां समावेश एव, न बाध्यबाधकभावः, विरोधाभावात नाप्येतयोरङ्गाङ्गिभावः, उभयोरपि परार्थत्वेन तदयोगात अनेकाल शित (1-1-55) इति सूत्रे सर्वश्चैतत्परिभाषाबोधित एव गृह्यते।

यत्तु आदेः परस्य (1-1-54), अलोऽन्त्यस्य (1-1-52) इत्येतावेव तद्बाधकाविति तन्न, उदःस्थादिति सूत्रविषयेऽस्याः पादः पत (6-4-130) इति सूत्रे भाष्ये सञ्चारितत्वात नाप्येतयोरियं बाधिका, एतयोर्निर्विषयत्वप्रसङ्गादिति तिविंशतेः (6-4-142) इति सूत्रे कैयटः।

अकञ्विषये तु नायं न्यायः, स्थानिवद्भावेनेव तन्मध्यपतितन्यायेन तद्बुद्धौव कार्यजननात।

इयं चावयवषष्ठीविषयेऽपि। अत एव तदोः सः सौ (7-2-106) इति सत्वम अतिस्य इत्यत्र उपसर्गतकारस्य न। निर्दिश्यमानयुष्मदाद्यवयवमपर्यन्तस्यैव यूयादयो न त्वतियूयमित्यादौ सोपसर्गावयवमपर्यन्तस्येति बोध्यम।

'पादःपत' (6-4-130) इति सूत्रे 'षष्ठी स्थाने' (1-1-49) इति सूत्रे च भाष्ये स्पष्टैषा॥12॥

ननु चेतेत्यादौ ह्रस्वस्येकारस्य प्रमाणत आन्तर्यादकारोऽपि स्यादत आह-

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ॥13॥

अनेकविधम-स्थानार्थगुणप्रमाणकृतम। अत्र मानम-षष्ठी स्थाने (1-1-49) इत्यत एकदेशानुवृत्त्या स्थानेग्रहणेऽनुवर्त्तमाने पुनः स्थानेऽन्तरतमः (1-1-50) इति सूत्रे स्थानेग्रहणमेव। तद्धि तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतम इत्यर्थकम। तमबग्रहणमेवानेकविधान्तर्यसत्तागमकम स्थानतः-स्थानेनेत्यर्थः।

तत्र स्थानत आन्तर्यम इको यणचि (6-1-77) इत्यादौ प्रसिद्धमेव। अर्थतः पद्दन्न (6-1-63) इत्यादौ स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति सिद्धान्तात यदर्थाभिधानसमर्थो यः स तस्यादेश इति तत्समानार्थतत्समानवर्णपादादीनां ते, तृज्वत्क्रोष्टुः (7-1-95) इति च। गुणतो वाग्घरिरित्यादौ। प्रमाणतः अदसोऽसेः (8-2-80) इत्यादौ। स्थानेऽन्तरतमः (1-1-50) सूत्रे भाष्ये स्पष्टैषा॥13॥

ननु प्रोढवानित्यत्र प्रादूहोढ (6-1-89 वा) इति वृद्धिः स्यादत आह-

अर्थवद्ग्रहणे नानर्थकस्य ॥14॥

विशिष्टरूपोपादाने ऽपस्थितार्थस्य शब्दं प्रति विशेषणतयाऽन्वयसम्भवे त्यागे मानाभावोऽस्या मूलम ।अत्रार्थः कल्पितान्वयव्यतिरेककल्पितः, शास्त्रीयोऽपि गृह्यते इति संख्यायाः (5-1-22) इति सूत्रे भाष्ये स्पष्टम ।

इयं वर्णग्रहणेषु नेति लस्य (3-4-77) इत्यत्र भाष्ये स्पष्टम । अत एवैषा विशिष्टरूपोपादानविषयेति वृद्धाः। एतन्मूलकमेव येन विधिः (1-1-72) इत्यत्र भाष्ये पठ्यते अलेवानर्थकेन तदन्तविधिरिति।

किञ्च स्वंरूपम ।(1-1-68) इति शास्त्रे स्वशब्देनात्मीयवाचिनार्थो गृह्यते, रूपशब्देन स्वरूपम । एवञ्च तदुभयं शब्दस्य संज्ञीति तदर्थः। तत्रार्थो न विशेष्यस्तत्र शास्त्रीयकार्यासम्भवात, किन्तु शब्दविशेषणम । एवं चार्थविशिष्टः शब्दः संज्ञीति फलितम ।तेनैषा परिभाषा सिद्धेति भाष्ये स्पष्टम ॥14॥

नन्वेवमपि महद्भूतश्चन्द्रमा इत्यत्र आन्महतः (6-3-46) इत्यात्त्वापत्तिरत आह-

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ॥15॥

गुणदागतो गौणः। यथा गोशब्दस्य जाड्यादिगुणनिमित्तोऽर्थो वाहीकः। अप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यते। मुखमिव प्रधानत्वान्मुख्यः प्रथम इत्यर्थः। गौणे ह्यर्थे शब्दः प्रयुज्मानो मुख्यार्थारोपेण प्रवर्तते। एवं चाप्रसिद्धत्वं गौणलाक्षणिकत्वं चात्र गौणत्वम । तेन प्रियत्रयाणामित्यादौ त्रयादेशो भवत्येव, तत्र त्रिशब्दार्थस्येतरविशेषणत्वेऽप्युक्तरूपगौणत्वाभावात ।

किञ्चायं न्यायो न प्रातिपदिककार्ये, किन्तूपात्तं विशिष्यार्थोपस्थापकं विशिष्टरूपं यत्र तादृशपदकार्य एव। परिनिष्ठितस्य पदान्तरसम्बन्धे हि गौर्वाहीक इत्यादौ गौणत्वप्रतीतिर्न तु प्रातिपदिकसंस्कारवेला-यामित्यन्तरङ्गत्वाज्जातसंस्कारबाधायोगः प्रातिपदिककार्ये प्रवृत्त्यभावे बीजम ।

श्वसुरसदृशस्यापत्यमित्यर्थके श्वाशुरिरित्यादावत इञः सिद्धये ऽपात्तमित्यादि। न च प्रातिपदिकपदं तादृशमिति वाच्यम, तेन हि प्रातिपदिकपदवत्त्वेनोपस्थितिरिति तस्य विशिष्यार्थोपस्थापकत्वाभावात । निपातपदं तु चादित्वेनैव चादीनामुपस्थापकमिति तदुद्देश्यककार्ये विधायके ओत ।(1-1-15) इत्यादावेतत्प्रवृत्त्या गोऽभवदित्यादौ दोषो न।

अग्नीषोमौ माणवकावित्यत्र प्रसिद्धदेवताद्वन्द्ववाच्यग्नीषोमदस्य तत्सदृशपरत्वेऽप्यन्तरङ्गत्वादीत्वषत्वे भवत एव। सदृशलाक्षणिकाग्निसोमपदयोर्द्वन्द्वे तन्नामकावित्यर्थके च नेत्वषत्वे। आद्ये गौणलाक्षणिकत्वादन्त्येऽप्रसिद्धत्वात । अत एवाग्निसोमौ माणवकावित्यत्र गौणमुख्यन्यायेन षत्ववारणपरम । अग्नेः स्तुत्स्तोमसोमाः (8-3-82) इति सूत्रस्थं भाष्यं सङ्गच्छते।

गां पाठयेत्यादौ मुख्यगोपदार्थस्य पाठनकर्मत्वासम्भवेन विभक्त्युत्पत्तिवेलायां प्रयोक्तृभिर्गौणार्थत्वस्य प्रतीतावप्यपदस्याप्रयोगेण बोद्धृभिः सर्वत्र पदस्यैव गौणार्थकत्वस्य ग्रहेण 'अत्वं त्वं सम्पद्यते, अमहान महान्भूतस्त्वद्भवतित्यादिभाष्यप्रयोगे त्वाद्यादेशदीर्घादीनां करणेन चास्य न्यायस्य पदकार्यविषयत्वमेवोचितम अन्यथा वाक्यसंस्कारपक्षे तेषु तदनापत्तिः।

किञ्च शुक्लामित्युक्ते कर्म निर्दिष्टं कर्ता क्रिया चानिर्दिष्टे इत्याद्युक्त्वा इहेदानीं गामभ्याज कृष्णां देवदत्तेत्यादौ सर्वं निर्दिष्टं गामेव कर्म देवदत्त एव कर्ता अभ्याजैव क्रियेत्यर्थकेन अर्थवत (1-2-45) सूत्रस्थभाष्येण कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थः क्रियावाचकादिप्रयोग इत्येतत्तात्पर्यकेण सामान्यतः क्रियाजन्यफलाश्रयत्वमात्रविवक्षायां द्वितीयादीनां साधुत्वान्वाख्यानमित्यर्थलाभेन पाठनक्रियान्वयकाले पदस्यैव गौणार्थत्वप्रतीतिः प्रयोक्तुरपि। एवमेतन्मूलकः अभिव्यक्तपदार्था ये इति श्लोकोऽपि पदकार्यविषयकः।

ध्वनितं चेदं सर्वादीनि (1-1-27) इति सूत्रे संज्ञाभूतानां प्रतिषेधमारभता वार्तिककृता पूर्वपर (1-1-34) इति सूत्रेऽसंज्ञायामिति वदता सूत्रकृताऽन्वर्थसंज्ञया तत्प्रत्याख्यानं कुर्वता भाष्यकृता च।

अर्थाश्रय एतदेवं भवति शब्दाश्रये च वृद्ध्यात्त्वे इति ओत (1-1-15) सूत्रस्थभाष्यस्य लौकिकार्थवत्त्वयोग्यपदाश्रय एष न्यायस्तद्रहितशब्दाश्रये च ते इत्यर्थः। गोतः (7-1-90) इति यथाश्रुतसूत्रे विशिष्टरूपोपादानसत्त्वेनोक्तरीत्यैवैतस्य भाष्यस्य व्याख्येयत्वादित्यलम ॥15॥

अर्थद्ग्रहणे (प. 14) इत्यस्यापवादमाह-

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥16॥

येन विधिः (1-1-72) इत्यत्र भाष्ये वचनरूपेण पठितैषा। तेन राज्ञा साम्ने त्यादावल्लोपो दण्डी वाग्मी इत्यादौ इन्हन (6-4-12) इति नियमः, सुपया सुस्त्रोता इत्यादौ अत्वसन्तस्य (6-4-14) इति दीर्घ सुशर्म्मा सुप्रथिमेत्यादौः मनः (4-1-11) इति ङीब्निषेधश्च सिद्धः।

अन्ये तु परिवेविषीध्वमित्यत्र ढत्वव्यावृत्त्ये क्रियमाणवत ङ्णः षीध्वम (8-8-78) इत्यत्राङ्गग्रहणादर्थवत्परिभाषाऽनित्या तन्मूलकमिदमित्याहुः।

विभाषेटः (8-3-79) इत्यत्रानर्थकस्यैव षीध्वमः सम्भवादत्रापि तस्यैव ग्रहणमिति भ्रमवारणायाङ्गदिति परे॥16॥

ननु उश्च (1-2-12) इत्यत्र 'लिङ्सिचौ' (1-2-11) इत्यत आत्मनेपदेष्वित्येव सम्बध्येतानन्तरवादत आह-

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥17॥

वाशब्द एवार्थे। परस्परान्वितार्थकपदानां सहैवानुवृत्तिनिवृत्ती इत्यर्थः। एककार्यनियुक्तानां बहूनां लोके तथैव दर्शनादिति भावः।

यत्त्वत्र ज्ञापकं नेड्वशि (7-2-8) इत्यत इडित्यनुवर्त्तमाने आर्धधातुकस्येट् (7-2-35) इत्यत्र पुनरिड्ग्रहणं तद्धि नेत्यस्यासम्बन्धार्थमिति। तन्न। दीधीवेवीटाम् (1-1-6) इति सूत्रे भाष्ये तत्रत्येड्ग्रहणप्रत्याख्याना-येड्ग्रहणेऽनुवर्त्तमाने पुनरिड्ग्रहणस्येटो गुणरूपविकाराभावार्थकत्वस्योक्तत्वेन तद्विरोधात्। नञो निवृत्तिस्तु क्वचिदेकदेशोऽप्यनुवर्त्तत इति न्यायेन सिद्धा।

वस्तुतस्तु दीधीवेवीटाम् (1-1-6) इति सूत्रस्यभाष्यमेकदेश्युक्ति। आर्धधातुकस्य (7-2-35) इति सूत्रस्थेड्ग्रहणस्य नेड्वशि (7-2-8) इति सूत्रे भाष्ये प्रत्याख्यानात् इत्करणेन गुरुतरयत्नमाश्रित्यैत्प्रत्याख्यानस्यायुक्तत्वात् ॥17॥

नन्वलुगधिकारः प्रागनः, उत्तरपदाधिकारः प्राग्ङ्गाधिकारादित्यनुपपन्नमेकयोगनिर्दिष्टवात्। तथा दामहायनान्ताच्च (4-1-27) इत्यादौ संख्याव्ययादेः (4-1-26) इत्यतः सङ्ख्यादेरित्यनुवर्ततेऽव्ययादेरिति निवृत्तमिति चानुपपन्नमत आह-

क्वचिदेकदेशोऽप्यनुवर्तते ॥18॥

एकत्रार्थे योगः = सम्बन्धस्तेन निर्दिष्टयोः समुदायाभिधायिद्वन्द्वनिर्दिष्टयोरित्यर्थ इति पक्षात्तिः, (4-2-25) इति सूत्रे कैयटः।

तावन्मात्रांशे स्वरितत्वप्रतिज्ञाबलाल्लभ्यमिदम्। स्पष्टा चेयं दामहायनान्ताच्च (4-1-27) इति सूत्रे औतोऽम्शसोः (6-1-93) इति सूत्रे च भाष्ये पूर्वा च॥18॥

ननु त्यदानीनामः (7-2-102) इत्यादिना इमम इत्यादावनुनासिकः स्यादत आह-

भाव्यमानेन सवर्णानां ग्रहणं न ॥19॥

अणुदित्(1-1-69) सूत्रेऽप्रत्ययः इत्यनेन सामर्थ्यात्सूत्रप्राप्तं, जातिपक्षेण प्राप्तं, गुणाभेदकत्वेन च प्राप्तं नेत्यर्थः। अत एवाणदित्सूत्रे प्रत्ययादेशाऽऽगमेषु सवर्णग्रहणाभावं प्राकरान्तरेणोक्त्वैवं तर्हि सिद्धे यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयति भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति।

किञ्च 'ज्याद ईयस' इत्येवान्तर्यतो दीर्घे सिद्धे 'ज्यादादीयसः' (6-4-160) इति दीर्घोच्चारणमस्या ज्ञापकम्। अणुदित् सूत्रे ज्यादात इति सूत्रे च भाष्ये स्पष्टैषाः।

चोः कुः (8-2-30) इत्यादौ भाव्यमानेनापि सवर्णग्रहणम्, विधेये उदिदुच्चारणसामर्थ्यात्। एतदेवाभिप्रेत्य 'भाव्यमानोऽप्सवर्णान्न गृह्णतीति नव्याः पठन्ति ॥19॥

नन्वेवं अदसोऽसेः (8-2-80) इत्यादिना अमू इत्यादौ दीर्घविधानं स्यादत आह-

भाव्यमानोऽप्युकारः सवर्णान गृह्णाति ॥20॥

'दिव उत' (6-1-131) 'ऋत उत' (6-1-111) इति तपरकरणमस्या ज्ञापकम। तित्स्वरितम (6-1-185) इति सूत्रे भाष्ये स्पष्टैषा।

ननु गवे हितं गोहितमित्यादौ प्रत्ययलक्षणेनावाद्यादेशापत्तिरत आह –

वर्णाश्रये नास्ति प्रत्ययलक्षणम ॥21॥

वर्णप्राधान्यविषयमेतत। तत्त्वञ्च 'प्रत्ययलोपे' (1-1-62) इति सूत्रे स्थानिवत (1-1-56) इत्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणग्रहणं प्रत्ययस्येतराविशेषणत्वरूपं यत्र प्राधान्यं तत्रैव प्रवृत्त्यर्थमित्येतत्सिद्धम। वर्णप्राधान्यं च वर्णस्येतराविशेषणत्वरूपं प्रत्ययनिरूपितविशेष्यतारूपं च, तेन गोहितमित्यादाववादि न चित्रायां जाता चित्रा इत्यादावण्योऽकारस्तदन्तान ङीबिति ङीप ङ्ग न।

इयमल्विधौ स्थानिवत्त्वाप्राप्तावपि प्राप्तप्रत्ययलक्षणविधेर्निषेधकेति स्पष्टं भाष्ये ॥21॥

ननु अतः 'कृकमि' (8-3-46) इत्यत्र कमिग्रहणेन सिद्धे कंसग्रहणं व्यर्थमत आह-

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥22॥

इदमेवास्या ज्ञापकमिति कैयटादयः। कंसेस्तु न कंसोऽनभिधानात। प्रत्ययस्य लुक (1-1-61) इत्यादौ भाष्ये स्पष्टा। ण्वुल्तृचौ (3-1-133) इत्यादौ भाष्ये व्युत्पन्नानीत्यपि। इदं शाकटायनररीत्या। पाणिनेस्त्वव्युत्पत्तिपक्षे एवेति शब्देन्दुशेखरे निरूपितम। 'आयनेयी' (6-1-1) इति सूत्रे भाष्ये स्फुटमेतत ॥22॥

ननु देवदत्तश्चिकीर्षती त्यादौ देवादेः सन्नन्तत्वप्रयुक्तधातुत्वाद्यापत्तिरत आह-

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम ॥23॥

'यस्मात्प्रत्ययविधिः' (1-4-13) इति सूत्रे यस्मात्प्रत्ययविधिस्तदादि प्रत्यय इति योगो विभज्यते। गृह्यमाण उपतिष्ठत इति शेषः, तेन तदाद्यन्तांशः सिद्धः। तदन्तांशस्तु येन विधिः (1-1-72) इत्यनेन सिद्धः। स च शब्दरूपं विशेष्यमादाय विशेष्यान्तरासत्त्वे।

यत्तु प्रत्ययेन स्वप्रकृत्यवयवकसमुदायाक्षेपात तद्विशेषणत्वेन तदन्तविधिरिति। तन्न, इयानित्यादौ तस्य तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात।

यत्र प्रत्ययो निमित्तत्वेनाश्रीयते, तत्र तदादीत्यन्तांशमात्रोपस्थितिरिति 'अङ्गस्य' (6-4-1) इति सूत्रे भाष्यकैयटयोः। एवं यत्रापि पञ्चम्यन्तात्परः प्रत्यय आश्रीयते तत्रापि तदादीत्यन्तांशोपस्थितिः, परन्तु तत्र पञ्चम्यन्तता। अत एव 'एङ्ह्रस्वात' (6-1-69) इति सूत्रे एन्तादित्यर्थलाभः।

RSK.S. Bhopal Campus

अस्याः परिभाषायाः प्रयोजनान्तरं 'येन विधिः' (1-1-72) इत्यत्र भाष्य उक्तम। 'परमगार्ग्यायण' इति। परमगार्ग्यस्यापत्यमिति विग्रहेऽपि गार्ग्यशब्दादेव प्रत्ययो न विशिष्टात। निष्कृष्य तावन्मात्रेणैकार्थीभावाभावेऽपि वृत्तिर्भवत्येव। अत्र चेदं भाष्यमेव मानमित्यन्यत्र विस्तरः। प्रत्ययमात्रग्रहणे एषा, न तु प्रत्ययाप्रत्ययग्रहण इति। उगितश्च (4-1-6) इति सूत्रे भाष्ये। इयमङ्गसंज्ञासूत्रे (1-4-13)भाष्ये स्पष्टा॥23॥

'येन विधिः' (1-1-72) इति सूत्रे भाष्य एतद्घटकतदन्तांशस्यापवादः पठ्यते-

प्रत्ययग्रहणे चापञ्चम्याः ॥24॥

यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते, तत्र तदन्तविधिर्नेत्यर्थः। यथा 'रदाभ्यां निष्ठातो नः' (8-2-42) इत्यत्र। तेन दृषत्तीर्णेत्यादौ धातुतकारस्य न नत्वम। तदन्तेत्यंशानुपस्थितावपि तदादीत्यंशस्योपस्थितौ रेफदान्तात्परस्य निष्ठातस्येत्यर्थ इति न दोषः, तदंशानुपस्थितौ मानाभावात। तदन्तांशोपस्थितौ तूभयोरेकविषयत्वमेव स्यादिति दृषत्तीर्ण इत्यादौ दोषः स्यादेव।

'स्यतासी लृलुटोः' (3-1-33) इत्यादौ लृलुटोः परयोरित्यर्थे नियमेनावधिसाकाङ्क्षत्वेन उपस्थितधातोरित्यस्यावधित्वेनान्वयान्न तदन्तविधिः। 'हल॒याब्भ्यः'(6-1-68) इत्यादौ तु न दोषः, तत्र कस्मादिति नियतावध्याकाङ्क्षया अभावेन पञ्चम्यन्तस्य प्रत्ययविशेषणत्वाभावात।

अङ्गसंज्ञासूत्रे (1-4-13) तु तदादेः प्रत्यये पर इत्यर्थे पञ्चम्यन्तस्य विशेषणत्वं स्पष्टमेव। अत ऐव उत्तमैकाभ्याम ॥5-4-90) इत्यादिनिर्देशाः सङ्गच्छन्ते॥24॥

नन्वेवं कुमारी ब्राह्मणिरूपेत्यादौ घरूप (6-3-43) इति ह्रस्वापत्तिरत आह-

उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणम ॥25॥

हृदयस्य हृल्लेखयदण्लासेषु (6-3-50) इत्यत्र लेखग्रहणात। तत्र लेखेति न घञन्तमनभिधानात।इयं च हृदयस्य इति सूत्र एव भाष्ये स्पष्टा ॥25॥

नन्वेवं परमकारीषगन्धीपुत्र इत्यत्रेव अतिकारीषगन्धयापुत्र इत्यत्र ष्यङः सम्प्रसारणं पुत्रपत्योः (6-1-13) इति स्यादत आह-

स्त्रीप्रत्यये चानुपसर्जने न ॥26॥

विषयसप्तमीयम। यः स्त्रीप्रत्ययः स्त्रियं प्राधान्येनाऽऽह तत्र तदादिनियमो न, यस्त्वप्राधान्येनाह तत्र तदादिनियमोऽस्त्येवेत्यर्थः।

प्रत्यासत्त्या यस्य समुदायस्य स्त्रीप्रत्ययान्तत्वमानेयं तदर्थं प्रत्यनुपसर्जनत्वमेवैतत्परिभाषाप्रवृत्तौ निमित्तम। तेन 'अतिराजकुमारिः' इत्यादौ राजकुमारीशब्दार्थस्यातिशब्दार्थं प्रत्युपसर्जनत्वेऽपि तदर्थं प्रत्यनुपसर्जनत्वा तदादिनियमाभावेन ह्रस्वसिद्धिः।

अत एवात्र परिभाषायां न शास्त्रीयमुपसर्जनत्वम्, असम्भवात्। अस्याः 'प्रत्ययग्रहण' (प.23) इत्यस्यापवादत्वात्तदेकवाक्यतापन्नत्वाच्चात्रापि ग्रहणपदसम्बन्धेन स्त्रीप्रत्ययसामान्यग्रहणे तद्विशेषग्रहणे च प्रवृत्तिर्न तु स्त्रीप्रत्ययास्त्रीप्रत्ययग्रहणे। ध्वनितञ्चेदम्। 'अर्थवत्' (1-2-45) सूत्रे भाष्ये। इयं वाचनिक्येव 'ष्य' (6-1-13) इति सूत्रे भाष्ये स्पष्टा ॥26॥

नन्वेवं 'तरप्तमपौ घः' (1-1-22) इत्यादिना तरबन्तादेः संज्ञा स्यादत आह-

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥27॥

'सुप्तिन्तम्' (1-4-14) इत्यन्तग्रहणमस्यां ज्ञापकम्। न च प्रत्यययोः पदसंज्ञायामपि 'प्रत्ययग्रहणे' परिभाषया तदन्तग्रहणसम्भवाज्ज्ञापितेऽपि फलाभाव इति वाच्यम्, पदसंज्ञायाः 'स्वादिषु' (1-4-17) इति विषये प्रकृतिनिष्ठतया पदग्रहणस्य प्रत्ययमात्रग्रहणत्वाभावात्। 'सुप्तिन्तम्'(1-4-14) इति सूत्रे भाष्ये स्पष्टा ॥27॥

ननु अवतप्ते 'नकुलस्थितमि'त्यादौ नकुलस्थितशब्दस्य क्तान्तत्वाभावात्समासो न स्यादत आह-

कृद्ग्रणे गतिकारकपूर्वस्यापि ग्रहणम्॥28॥

अस्याश्च कर्मणि क्तान्त उत्तरपदेऽनन्तरो गतिः प्रकृतिस्वर इत्यर्थके 'गतिरनन्तरः' (6-2-49) इति सूत्रेऽनन्तरग्रहणं ज्ञापकम्। तद्धि अभ्युद्धृतमित्यादावतिव्याप्तिवारणार्थम्। प्रत्ययग्रहणपरिभाषयोद्धृतस्य क्तान्तत्वाभावादेवाप्राप्तौ तद् व्यर्थं सदस्या ज्ञापकम्। न चाभ्युद्धृतमित्यादौ परत्वाद् 'गतिर्गतौ' (8-1-70) इत्यनेनाभेर्निघात एवेति वाच्यम्, पादादिस्थत्वेन पदात्परत्वाभावेन च तदप्राप्तेः। अनन्तरग्रहणे कृते तु तत्सामर्थ्याद्व्रत्याक्षिप्तधातुनिरूपितमेवानन्तर्यं गृह्यत इति न दोषः। न चाभ्युद्धृतमित्यादावभिन्ना समासेऽनन्तरस्योदः पूर्वपदत्वाभावेऽति स्वरार्थं तदितिवाच्यम्, 'कारकाद्दत्त' (6-2-148) इति सूत्रे कारकादिति योगं विभज्य तत्र गतिग्रहणमनुवर्त्य कारकादेव परं गतिपूर्वं पदं क्तान्तमन्तोदात्तमिति नियमेन थाथादिस्वराप्राप्त्या कृत्स्वरेण उदात्तत्वसिद्धेः। तस्मादनन्तरग्रहणं व्यवहितनिवृत्त्यर्थमेवेति ज्ञापकमेव।

यत्र गतिकारकसमभिव्याहृतं कृदन्तं तत्र कृद्ग्रहणे तद्विशिष्टस्यैव ग्रहणम्, अपिशब्दात्तदसमभिव्याहृतस्य केवलस्यापीति तदर्थः। अन्यथा अनया कृद्ग्रहणविषये परत्वात् 'प्रत्ययग्रहण'परिभाषाया बाध एव स्यादित्यपि ग्रहणम्।

अत एव 'साङ्कूटिनमि'ति 'गतिकारकोपपदानाम्'(प. 76) इति 'कृद्ग्रहण' इति च परिभाषाभ्यां कृदन्तेन समासे कृते विशिष्टादेवाणि सिद्ध्यति, न तु 'सङ्कौटिनमि'तीति

RSK.S Bhopal Campus

'पुंयोगात्' (4-1-48) इति सूत्रे भाष्योक्तं सङ्गच्छते। अन्यथा तत्र केवलं कूटिन्निित्येतस्यापीनुणन्तत्वात्ततोऽपि पाक्षिकदोषो दुर्वार एव स्यात्।

स्पष्टं चेदं सर्वं 'समासेऽनञ्पूर्वे' (7-1-37) इति सूत्रे भाष्यकैयटयोः। 'गतिरनन्तरः' (6-2-49) इत्यत्र तु गतेः पूर्वपदस्य क्तान्त उत्तरपदे परे कार्यविधानात्तत्समवधानेऽपि केवलस्य क्तान्तत्वेन ग्रहणं बोध्यम्। इयं च कृत्सामान्यग्रहणे कृद्विशेषग्रहणे च, न तु कृदकृद्ग्रहण इति 'अनुपसर्जनात्'(4-1-14) इति सूत्रे भाष्ये स्पष्टम्॥28॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥29॥

पदमङ्गं च विशेष्यं विशेषणेन च तदन्तविधिः। 'येन विधिः' (1-1-72) इत्यस्यायं प्रपञ्चः तेन 'इष्टकचितम्,पक्वेष्टकचितमि'त्यादौ 'इष्टकेषीकामालानां चित्'(6-3-65) इति ह्रस्वः, महान्,परममहान्,परमातिमहानित्यादौ 'सान्तमहतः' (6-4-10) इति दीर्घश्च सिद्धः। अत एव तदुत्तरपदस्येति पाठोऽयुक्त इति भाष्ये स्पष्टम्। अत्र पदशब्देनोत्तरपदाधिकारः केवलपदाधिकारश्च।

'पादस्य पदाज्याति' (6-3-52) इत्यत्र न तदन्तग्रहणं लक्ष्यानुरोधादिति सर्वं 'येन विधिः' (1-1-72) इत्यत्र भाष्ये स्पष्टम्॥29॥

नन्वेवम्'अस्यापत्यमिरि'त्यादावदन्तप्रातिपादिकाभावादिञ् न स्यादत आह-

व्यपदेशिवदेकस्मिन्॥30॥

निमित्तसद्भावाद्विशिष्टोऽपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी। यस्तु व्यपदेशहेत्वभावादविद्यमानव्यपदेशोऽसहायः स तेन तुल्यं वर्त्तते, कार्यं प्रतीत्येकस्मिन्नसहायेऽपि तत्कार्यं कर्त्तव्यमित्यर्थः। तेनाकारस्याप्यदन्तत्वान्न क्षतिः।

एकस्मिन्नित्युक्ते सभासन्नयने आकारस्य नादित्वम्, दरिद्राधातोविकारस्य नान्तत्वम्। अन्यथा 'सभासन्नयने भव' इत्यर्थे 'वृद्धाच्छः' (4-2-114) दरिद्रातेरिवर्णान्तलक्षणोऽच्च स्यात्। अत एव हरिष्वित्वादौ सोःपदत्वं न, लोकेऽपि बहुपुत्रसत्त्वे नैकस्मिन्'ज्येष्ठकनिष्ठत्वादिव्यवहारोऽयं मे ज्येष्ठ, कनिष्ठो मध्यम इति किन्त्वेकपुत्रसत्त्व एव।

अनेन चाशास्त्रीयस्याप्यतिदेशः। अत एव 'इयाय' इत्यादावेकाच्त्वनिबन्धनद्वित्वसिद्धिः। अत एव 'भवती'त्यादौ 'भू' इत्यस्याङ्गत्वम्,'इयानि'त्यादौ कार्यकालपक्षे तद्धितान्तत्वनिबन्धनप्रातिपदिकत्वं च सिद्ध्यति। अन्यथा यस्माद्विहितस्तदादित्वाभावान्न स्यात्।

यत्तु यौऽर्थवांस्तत्रार्थस्य त्यागोपादानाभ्यामेकाज्व्यपदेशो यथा 'ईयाये'त्यादावर्थवतो धातोरयं वर्णरूपः एकोऽजिति कैयटः। तन्न, तस्य, 'एकपदाऋगि'त्यत्र भाष्योक्तरीत्या मुख्यव्यवहारसत्त्वात्। 'एकपदा ऋगि'त्यत्र 'अर्थेन

युक्तो व्यपदेश' इति भाष्ये उक्तम,। ऋक्त्वादेरर्थशब्दोभयवृत्तित्वेन तस्याः शब्दमात्ररूपं पदमेकोऽवयव इत्यर्थ इति तदाशयः।

तस्मादेकस्मिंस्तत्तद्धर्मारोपेण युगपद्यथा ज्येष्ठत्वादिव्यवहारो यथा च 'शिलापुत्रकस्य शरीरमि'त्यादावेकस्मिन्नारोपितानेकावस्थाभिः समुदायरूपत्वाद्यारोपेण 'एतस्य शरीरमि'त्यादिव्यवहार-स्तथाऽत्रैकाच्त्वादिव्यवहारोपपत्तिरिति लोकन्यायसिद्धेयम।

न चासहाय एवैतत्प्रवृत्तौ 'भवती'त्यत्र 'भू' इत्यस्याङ्गत्वानापत्तिः ससहायत्वादिति वाच्यम,।शपमादायाङ्गत्वे कार्ये यस्माद्विहितस्तदादित्वे तस्य ससहायत्वाभावाल्लोके विजातीयकन्यादिसत्त्वेऽप्येकपुत्रस्य तस्मिन्नेव 'अयमेव ज्येष्ठ' इत्यादिव्यवहारवत।

न चैवं 'निजौ चत्वार एकाच' इति भाष्यासङ्गतिः, इकारस्यासहायत्वाभावेन तत्रैकाच्त्वानुपपादनादिति वाच्यम।'एकस्मिन्नि'त्यस्यापर्यालोचनया तत्प्रवृत्तेः।

'अर्थवता व्यपदेशिवद्भाव' इत्यत्रार्थवत्पदेनाप्यसहायत्वमुपलक्ष्यते। अर्थबोधकेन शब्देन व्यपदेशिसदृशो भावः कार्यं लभ्यते इति तदर्थः। प्रायोऽसहाय एवार्थवत्त्वात।

'कुरुते' इत्यादौ तशब्दाकारोऽचामन्त्य इति व्यवहारे, 'स आदिर्यस्ये'ति व्यवहारे चासहाय एवेति तत्र व्यपदेशिवद्भावेन टिसंज्ञासिद्धिरित्यन्यत्र विस्तरः ॥30॥

ननु गर्गादिभ्यो विहितो यञ ञादन्तविधिना परमगर्गादिभ्योऽपि स्यादत आह-

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥31॥

इयं च 'समासप्रत्ययविधौ प्रतिषेध ऽगिद्वर्णग्रहणवर्जम' इति वार्तिकस्थप्रत्ययांशानुवादः। अत एवायं प्रत्ययविधिविषय एव। अत एव 'येन विधिः' (1-1-72) इति सूत्रभाष्ये प्रत्ययविधिभिन्ने 'असृन' (6-4-11) इत्यादौ गृह्यमाणप्रातिपदिकेनापि तदन्तविधिप्रतिपादनं 'स्वसा, परमस्वसे'त्याद्युदाहरणं च सङ्गच्छते।

अत एव च तदन्तविधिसूत्रे भाष्ये समासेत्यादिनिषेधस्य कथनवदस्य न कथनम। सोऽपि निषेधो विशिष्य तत्तद्रूपेण गृहीतप्रातिपदिकसूत्र एव। ध्वनितं चेदम।'असमासे निष्कादिभ्यः' (5-1-20) इति सूत्रे भाष्ये।

अत्र च ज्ञापकं 'सपूर्वाच्च' (5-2-87) इति सूत्रम,।अन्यथा 'पूर्वादिनिः' (5-2-86) इत्यत्र तदन्तविधिनैव सिद्धे किं तेन ॥31॥

नन्वेवं 'सूत्रान्ताट्ठक' (4-2-60), 'दशान्ताड्डः' (5-2-45) 'एकगोपूर्वात'(5-2-118) इत्यादेः केवलसूत्रशब्ददशन्शब्दैकशब्दादिष्वपि प्रवृत्तिर्व्यपदेशिवद्भावात्स्यादत आह-

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥32॥

'पूर्वात्सपूर्वादिनिरि'त्येकयोगे एव कर्त्तव्ये पृथग्योगकरणमस्या ज्ञापकम। न च 'इष्टादिभ्यः' (5-2-88) इति सूत्रेऽनुवृत्त्यर्थं तथा पाठः, अत एव 'अनिष्टी'त्यादिसिद्धिरिति वाच्यम। ज्ञापकपरभाष्यप्रमाण्येन 'अनिष्टी'-त्यादिप्रयोगाणामनिष्टत्वात,। एकयोगेऽपि तावदुत्तरत्रानुवृत्तौ बाधकाभावाच्च।

अत एव 'नान्तादसङ्खयादेः' (5-2-49) इति चरितार्थम। अन्यथा 'पञ्चमः' इत्यादावपि व्यपदेशिवद्भावेन सङ्ख्यादित्वात्तद्वैयर्थ्यं स्पष्टमेव।

इयं च प्रातिपदिकग्रहणे एवं न तु प्रातिपदिकाऽप्रातिपदिकग्रहणे, तेन 'ऽगितश्च' (4-1-6) इत्यत्र न दोष इति तत्रैव भाष्ये स्पष्टम।

इयं 'ग्रहणवता' (प. 31) इति च परिभाषा प्रत्ययविधिविषयैवेति 'असमासे निष्कादिभ्यः' (5-1-20) इति सूत्रे भाष्यकैयटयोः, तेन 'अहन' (8-2-68) इत्यादेः परमाहन्शब्दे केवलाहन्शब्दे च प्रवृत्तिरित्यन्यत्र विस्तरः ॥32॥

ननु 'वान्तो यि' (6-1-79) इत्यादौ 'यादौ प्रत्यये' इत्यर्थः कथमत आह-

यस्मिन्विधिस्तदादवल्ग्रहणे॥33॥

तदन्तविधेरपवाद इयम।वाचनिक्येषा 'येन विधिः' (1-1-72) इत्यत्र भाष्ये पठिता। अस्याश्च स्वरूपसती सप्तमी निमित्तम।अत एव 'नेड्वशि कृति' (7-2-8) इत्यादौ वशादेः कृत इत्याद्यर्थलाभः। इयं च 'आर्द्धधातुकस्येट्' (7-2-35) इति सूत्रे वलादेरित्यादिग्रहणसामर्थ्याद् विशेष्यविशेषणयोरुभयोः सप्तम्यन्तत्व एव प्रवर्त्तते, तेन 'डःसिधुट्' (8-3-29) इत्यादौ सादेः पदस्येति नार्थः। 'तीषसह' (7-2-48) 'सेसिचि' (7-2-57) इत्यादौ यथा तादेरित्याद्यर्थलाभस्तथा शब्देन्दुशेखरे निरूपितम॥33॥

घटपटं 'घटपटावि'त्यादिसिद्धय आह-

सर्वो द्वन्द्वो विभाषयैकवद्भवति ॥34॥

'द्वन्द्वश्च प्राणि' (2-4-2) इत्यादिप्रकरणाविषयः सर्वो द्वन्द्व इत्यर्थः। 'चार्थे द्वन्द्वः' (2-2-29) इति सूत्रेण समाहारेतरेतरयोगयोरविशेषेण द्वन्द्वविधानान्न्यायसिद्धेयम। 'तिष्यपुनर्वस्वोः' (1-2-63) इति सूत्रस्थं बहुवचनस्येतिग्रहणमस्या ज्ञापकम। तद्धीदं 'तिष्यपुनर्वस्वि'त्यत्र तद्व्यावृत्त्यर्थम।

न चैवमप्यत्र 'जातिरप्राणिनाम' (2-4-6) इति नित्यैकवद्भावेन बहुवचनाभावादिदं सूत्रं व्यर्थमिति वाच्यम,। तद्वैकल्पिकत्वस्याप्यनेन ज्ञापनात। न चैते प्राणिन इति वाच्यम। 'आपोमयः प्राणः' इति श्रुतेरद्भिर्विना ग्लायमानप्राणानामेव प्राणित्वात। स्पष्टं चेदं 'तिष्यपुनर्वस्वोः' (1-3-63) इति सूत्रे भाष्ये। अत एव 'द्वन्द्वश्च प्राणि' (2-4-2) इत्यादेः प्राण्यङ्गादीनामेव समाहार इति विपरीतनियमो न ॥34॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥35॥

'व्यत्ययो बहुलम्' (3-1-85) इति सूत्रे भाष्ये बहुलमिति योगविभागेन 'षष्ठीयुक्तश्छन्दसि' (1-4-9) इति सूत्रे वेति योगविभागेन चैषा साधिता, तेन 'प्रतीपमन्य' 'ऊर्मिर्युध्यती'त्यादि सिद्धम्। 'युद्ध्यत' इति प्राप्नोति ॥35॥

ननु 'क्षियः' (6-4-59, 8-2-46) इत्यादावियङ् कथमत आह-

प्रकृतिवदनुकरणं भवति॥36॥

'क्षिय' इतीयङ्निर्देशोऽस्या ज्ञापकः। तत्रैव प्रातिपदिकत्वनिबन्धनविभक्तिकरणादनित्या चेयमिति 'क्षियो दीर्घात्' (8-2-46) इति सूत्रे भाष्ये स्पष्टम्॥36॥

ननु 'रामावि'त्यादौ वृद्धौ कृतायां कार्यकालपक्षे कथं पदत्वम्, उभयत आश्रयणेऽन्तादिवत्त्वाभावाद्यस्माद्विहितस्तदादितदन्तत्वाभावादत आह-

एकदेशविकृतमनन्यवत्॥37॥

अनन्यवदित्यस्यान्यवन्नेत्यर्थः। तत्रान्यसादृश्यनिषेधेऽन्यत्वाभावः सुतराम्। अत एव तादृशादर्थबोधः। अन्यथा शक्तावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यात्। एवं च रामिति मान्तस्य यस्माद्विहितस्तत्त्वम्। औ इत्यस्य परादिवत्त्वेन सुप्तमिति तदादितदन्तत्वमार्थसमाजग्रस्तम्।

छिन्नपुच्छे शुनि श्वत्वव्यहारवन्मान्ते तत्त्वं लोकन्यायसिद्धम्। अत एव 'प्राग्दीव्यतः' (4-1-83) इति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिदमित्युक्त्वा 'किमर्थं विकृतनिर्देशः ?' एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषैकदेशविकृतमनन्यवदित्युक्तम्। एतेन- अयं न्यायः शास्त्रीयकाय एव शास्त्रीयविकार एवेत्यपास्तम्। विकृतावयवनिबन्धनकार्ये तु नायम्, छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहार-वद्विकृतावयवव्यवहारस्य दुरुपपादत्वात्। एवमक्तपरिमाणग्रहणेऽपि नायम्, उक्तयुक्तेः। एतत्। 'येनविधिः' (1-1-72) इत्यत्र भाष्यकैयटयोर्ध्वनितम्।

यत्र त्वर्धं तदधिकं वा विकृतं, तत्र जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तत्वाप्रतीतौ कार्यसिद्धयर्थं विकृतानलरूपावयवत्वप्रतीत्यर्थञ्चस्थानिवत्सूत्रम्। क्वचित्तु लक्ष्यानुरोधान्न्यायानाश्रयणम्।तेन 'अभीयादित्यादिसिद्धिः।'

स्पष्टं च क्वचिन्न्यायाप्रवृत्तिः 'प्रथमयोः पूर्वसवर्णः' (6-1-102) इत्यत्र कैयटेन दर्शितेत्यन्यत्र विस्तरः ॥37॥

इति शास्त्रत्वसम्पादनोद्देशनामकं प्रथमं प्रकरणम्।

RGS, Bhopal Campus

अथ बाधबीजन्नाम द्वितीयं प्रकरणम ।

पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥38॥

पूर्वात्परं बलवत,विप्रतिषेधशास्त्रात्पूर्वस्य परं बाधकमिति यावत ।

नन्वेवं 'भिन्धी'त्यत्र परत्वात ङ्णातः। बाधितो धिर्न स्यादत आह-

पुनः प्रसङ्गविज्ञानात्सिद्धम ॥39॥

नन्वेवं 'तिसृणामि'त्यत्र परत्वात्तिस्त्रादेशे पुनस्त्रयादेशः स्यादत आह-

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥40॥

तत्र क्वचिच्चरितार्थयोरेकस्मिन ।युगदुभयोरसम्भवेन बाधकाभावात्पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थं विप्रतिषेधसूत्रमिति सकृद्गतिन्यायसिद्धिः। यथा- तुल्यबलयोरेकः प्रेष्यो भवति, स तयोः पर्यायेण कार्यं करोति। यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये, तदोभयोर्नकरोति यौगपद्यासम्भवात । तथा शास्त्रयोर्लक्ष्यार्थयोः क्वचिल्लक्ष्ये यौगपद्येन प्रवृत्यसम्भवादप्रतिपत्तौ प्राप्तायामिदं परविध्यर्थम ।तत्र कृते यदि पूर्वप्राप्तिरस्ति, तर्हि तदपि भवत्येवेति पुनःप्रसङ्गविज्ञानसिद्धिरिति विप्रतिषेधसूत्रे भाष्ये स्पष्टम ।

यत्तु कैयटादयो व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणोपप्लवादुभयोरपि शास्त्रयोस्तल्लक्ष्यविषययोरचारितार्थ्येन पर्यायेण द्वयोरपि प्राप्तौ परमेवेति नियमार्थमिदमिति 'सकृद्गति'न्यायसिद्धिः। अत्र पक्षे एतन्नियमवशादेतल्लक्ष्यविषयपूर्वशास्त्रानुपप्लव एव। जातिपक्षे तु उद्देश्यतावच्छेदकाक्रान्ते क्वचिल्लक्ष्ये चरितार्थयोर्द्वयोः शास्त्रयोः 'सत्प्रतिपक्ष'न्यायेन युगपदुभयासम्भवरूपविरोधस्थल उभयोरप्यप्राप्तौ परविध्यर्थमिदमिति पुनः प्रसङ्गविज्ञानसिद्धिरित्याहुः। तन्न, व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्षे इत्यत्र मानाभावात । 'न ब्राह्मणं हन्यादि'त्यादौ जात्याश्रयसकलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात ।

अत एव 'सरूप' सूत्रे भाष्ये जातौ पदार्थेऽनवयवेन साकल्येन विधिप्रवृत्तेः गौरनुबन्ध्य इत्यादौ सकलगवानुबन्धनासम्भवात्कर्मणो वैगुण्यमुक्तम । द्रव्यवादे चासर्वद्रव्यावगते 'गौरनुबन्ध्य' इत्यादावेकः शास्त्रोक्तोऽपरोऽशास्त्रोक्त इत्युक्तम ।किञ्च न हि भाष्योक्ततृजादिदृष्टान्तस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्ष इत्यत्र मानमस्ति।

अपि च व्यक्तिपक्षेऽपि अन्यव्यक्तिरूपविषयलाभेन चरितार्थयोरियं व्यक्तिर्विरोधात । स्वविषयकत्वं न कल्पयतीति वक्तुं शक्यम । जातिपक्षेऽपि तज्जात्याश्रयतद्व्यक्तिविषकत्वमेव नैतद्व्यक्तिविषयत्वमित्यत्र विनिगमकाभावः।

RSKS, Bhopal Campus

तत्र लक्ष्यानुसारात क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसम्मतमार्ग एव युक्त इति बोध्यम।

द्वयोः कार्ययोर्यौगैपद्येनासम्भव एव विप्रतिषेधशास्त्रोपयोगी। इदम इको गुण' (1-1-3) इति सूत्रे कैयटे स्पष्टम। यथा 'शिष्टादि'त्यादौ तातङ्-शाभावयोर्युगपत्प्रवृत्तौ स्वत्वनिमित्तानन्तर्यासम्भवो यद्यपि तातादेः स्थानिवद्भावेनास्त्येव तत, तथाप्यादेशप्रवृत्त्युत्तरमेव स, न तु तत्प्रवृत्तिकाले। एवं नुम्तृज्वत्वयोः 'प्रियक्रोष्टूनी'त्यादौ युगपदसम्भवो 'यदागमाः' (प. 11) इत्यस्य नुम्प्रवृत्त्युत्तरं प्रवृत्तेः। एवं 'भिन्धी'त्यत्र तातङ्घिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्गरूपनिमित्तानन्तर्यस्य चासम्भवो बोध्यः। नुम्नुटोरपि नुट्यजादिविभक्त्याऽऽनन्तर्यबाधो नुमि ह्रस्वान्ताङ्गबाध इत्यसम्भवाद्विप्रतिषेधः।

क्वचिदिष्टानुरोधेन पूर्वशास्त्रे स्वरितत्वप्रतिज्ञाबलात। स्वरितेनाधिकं कार्यमित्यर्थात्पूर्वमेव भवति। तेन 'सर्वे पूर्वविप्रतिषेधाः संगृहीता' इति 'स्वरितेन' (1-3-11) इति सूत्रे भाष्ये। विप्रतिषेधसूत्रस्थपरशब्दस्येष्टवाचित्वात। तत्संग्रह इति विप्रतिषेधसूत्रे भाष्ये ॥40॥

नन्वेवम। एधते इत्यादौ परत्वाद्विकरणे 'अनुदात्तङितः' (1-3-12) इत्यादिनियमानुपपत्तिस्तेन व्यवधानादत आह-

विकरणेभ्यो नियमो बलीयान ॥41॥

अत्र 'वृदभ्यः स्यसनोः' (1-3-92) इति सूत्रेण स्ये विभाषाऽतङ्विधानं ज्ञापकम। अन्यथा स्य व्यवधाने नियमाप्रवृत्तौ सामान्यशास्त्रेणोभयसिद्धौ विकल्पविधानं व्यर्थं स्यात। अत्रार्थे ज्ञापिते तु 'स्य' इति विषयसप्तमी बोध्येति 'अनुदात्तङितः' (1-3-12) इत्यत्र भाष्यकैयटयोः स्पष्टम।

विकरणव्यवधानेऽपि नियमप्रवृत्तेरिदं ज्ञापकमिति 'शदेःशितः' (1-3-60) इत्यत्र भाष्ये ध्वनितम।

वस्तुतः - अस्माज्ज्ञापकात। 'अनुदात्तङितः' (1-3-12) इत्यादिप्रकरणं तिबादिविध्येकवाक्यतया विधायकम। तत्र 'धातोः' (3-1-91)इति विहितपञ्चमी, तत्समानाधिकरणम। 'अनुदात्तङितः' (1-3-12) इत्यादिविहितविशेषणमेव। एवं च लावस्थायां स्येऽपि तद्व्यवधाने तङ्सिद्धिः। शबादिभ्यस्तु पूर्वमेव नियमः।

यद्वा- लमात्रापेक्षत्वादन्तरङ्गा आदेशा लकारविशेषापेक्षत्वात्स्यादयो बहिरङ्गा इति दिग्योगलक्षणपञ्चम्यामपि न दोषः। अत्र पक्षे 'वृद्भ्यः स्य' (1-3-92) इति सूत्रं स्य विषय इति व्याख्येयम।आत्मनेपदशब्दादौ भाविसंज्ञाश्रयणीयेति तत्त्वम।

भिन्नवाक्यतया सामान्यशास्त्रविहितानां नियमे तु लुगादिनेव नियमेन जातनिवृत्तिरङ्गीकार्या। 'भुक्तवन्तं प्रति मा भुङ्क्था इति ब्रूयात किं तेन कृतं स्यादि'ति न्यायस्तु नात्र शास्त्र आश्रयितं युक्तो नियमादिशास्त्राणां वैयर्थ्यापत्तेः।

ध्वनितं चेदं 'स्थानेऽन्तरतमः' (1-1-50) इति सूत्रे भाष्ये। शास्त्रानर्थक्यन तु वृद्धिसंज्ञासूत्रे तिरस्कृतम। सामान्यशास्त्रेणोत्पत्तिस्तु सरूपसूत्रस्थकैयटरीत्या प्रधानानुरोधेन गुणभेदकल्पना तावत प्रकृतिकल्पनया कार्या, प्रत्ययनिवृत्तौ च तत्कल्पितप्रकृतेरपि निवृत्तिःकल्प्येति गौरवमित्यम्यत्र विस्तरः ॥41॥

परान्नित्यं बलवत ॥42॥

कृताकृतप्रसङ्गित्वात। तत्राक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावकस्यैव तत्कल्पनमुचितमिति नित्यस्य बलवत्वे बीजम। तदाह-कृताकृतप्रसङ्गि नित्यम। तद्विपरितमनित्यम। अत एव 'तुदतीत्यादौ' परादपि गुणान्नित्यत्वात शप्रत्ययादिर्भवति ॥42॥

यद्व्यक्तिसम्बन्धितया पूर्वं प्रवृत्तिः, तद्व्यक्तिसम्बन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसङ्गित्वमित्याशयेनाह-

शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ॥43॥

इदं 'शदेःशितः' (1-3-60) इति सूत्रे भाष्ये स्पष्टम तत्र हि 'न्यविशते'त्यत्र विकरणे कृते तदन्तस्याडकृते धातुमात्रस्येत्यडनित्य इत्युक्तम ॥43॥

एतत्तुल्यन्यायेनाह-

शब्दान्तरात प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम ॥44॥

एतन्मूलकमेवाह-

लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥45॥

अतिदेशविषये इयम 'असिद्धवत'(6-4-22) सूत्रे कैयटेनोक्ता ॥45॥

यदा तु शास्त्रव्यतिरेकेण तद्विधेयकार्ययोरेव नित्यत्वादिविचारः, यदापि व्यक्तिविशेषाश्रयणाभावस्तदाह-

क्वचित कृताकृतप्रसङ्गमात्रेणापि नित्यता ॥46॥

कृते द्वितीये नित्यत्वेनाभिमतस्य पुनः प्रसङ्गमात्रं नित्यत्वव्यवहारे प्रयोजकं न तु बाधकाबाधितफलोपहितप्रस गोऽपि तथेति भावः ॥46॥

तदाह-

यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम ॥47॥

क्वचित्तु बाधकाबाधितफलोपहितप्रसङ्ग एव गृह्यते। तदाह-

यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम ॥48॥

R.S.S. Bhopal Campus

सप्तमे कैयटनैतदुपष्टम्भकं लोकव्यवहारद्वयमुदाहृतम। वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हतेऽपि सुग्रीवस्य वालितः प्राबल्यं न व्यवहरन्ति, भगवत्सहायैः। पाण्डवानां प्राबल्यं व्यवहरन्ति चेति। सर्वं चेदं लक्ष्यानुरोधाद्व्यवस्थितम ॥48॥

'लुटः प्रथमस्य' (2-4-85) इति सूत्रे भाष्ये-

स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवति ॥49॥

यत्र त्वेकस्यैव कार्यस्य परत्वं नित्यत्वं च तत्रेच्छयान्तरत्तदुभयं वा तस्य बलवत्त्वे नियामकमुल्लेख्यम।अत एव तत्र तत्र परत्वान्नित्यत्वाच्चेति भाष्ये उच्यते।

वस्तुतस्तत्र परत्वादित्युक्तिरेकदेशिनः। स्पष्टं चेदं विप्रतिषेधसूत्र कैयटे। 'णौ चि' (7-4-1) इति ह्रस्वापेक्षया नित्यत्वान्तरङ्गत्वप्रयुक्तद्वित्वस्य प्रथमतः प्रवृतौ नित्यत्वादित्येव भाष्य उक्तम।एवं नित्यान्तरङ्गयोर्बलवत्त्वमपि यौगपद्यासम्भव एवेति बोध्यम ॥49॥

नित्यादप्यन्तरङ्गं बलीयः अन्तरङ्गे बहिरङ्गस्यासिद्धत्वात।तदाह-

असिद्धं बहिरङ्गमन्तरङ्गे ॥50॥

अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये, अन्तर्भूतान्यङ्गानि निमितानि यस्य तदन्तरङ्गम। एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं बहिरङ्गम। एतच्च 'खरवसानयोः' (8-3-15) इति सूत्रे 'असिद्धवत'(6-4-22) सूत्रे च भाष्यकैयटयोः स्पषटम।

अत्राङ्गशब्देन शब्दरूपं निमित्तमेव गृह्यते, शब्दशास्त्रे तस्यैव प्रधानत्वात। तेनार्थनिमित्तकस्य न बहिरङ्गत्वम। अत एव 'न तिसृचतसृ' (6-4-4) इति निषेधश्चरितार्थः। अन्यथा स्त्रीत्वरूपार्थनिमित्तकतिस्रपेक्षयान्तरङ्गत्वात्त्रयादेशे तदसङ्गतिः स्पष्टैव। अत एव त्रयादेशे 'स्रन्तस्य प्रतिषेधः' इति स्थानिवत्सूत्रस्थभाष्यवार्तिकादि सङ्गच्छते।

एतेन 'गौधेरः, पचेदि'त्यादावेयादीनामङ्गसंज्ञासापेक्षत्वेन बहिरङ्गतयाऽसिद्धत्वाद्वलिलोपो न स्यादिति परास्तम। एयादेशादेरपरनिमित्तकत्वेनान्तरङ्गत्वाच्च।

ननु 'येन विधिस्तदन्तस्य' (1-1-72) इति सूत्रे भाष्ये 'इको यणचि' (6-1-77) इत्यादावपि तदन्तविधौ 'स्योन' इत्यत्रान्तरङ्गत्वाद्यणो गुणबाधकत्वमिष्यते तन्न सिद्धयेत,ऊनशब्दमाश्रित्य यणादेशो नशब्दमाश्रित्य गुण इत्यन्तरङ्गत्वाद् गुण एव स्यादित्युक्तम।

अत्र कैयटः - सिवेर्बाहुलकादौणादिके न प्रत्यये गुणवलोपोठां प्रसङ्ग ऊठपवादत्वाद्वलोपं बाधते गुणं त्वन्तरङ्गत्वाद् बाधते। गुणो

ह्यङ्गसम्बन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकं चाश्रयति। ऊठ् तु वकारान्तमङ्गमनुनासिकादिकञ्च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गः। तत्र कृते यण्गुणौ प्राप्नुत इति। एवञ्च संज्ञापेक्षस्यापि बहिरङ्गत्वं स्पष्टमेवोक्तमिति चेत्, न। तदन्तविधावपि बहुपदार्थापेक्षत्वरूपबहिरङ्गत्वस्य गुणे सत्त्वेन तत्र दोषकथनपरभाष्यासङ्गतेः, बहिरङ्गान्तरङ्गशब्दाभ्यां बह्वपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादयाऽलाभाच्च। तथा सति 'असिद्धं बह्वपेक्षमल्पायेक्ष' इत्येव वदेत। अत एव 'विप्रतिषेध' सूत्रभाष्ये गुणाद्यणादेशोऽन्तरङ्गत्वादित्यस्य 'स्योन' इत्युदाहरणं न तु गुणादूठ् अन्तरङ्गत्वादित्युक्तम। त्वद्रीत्या तदपि वक्तुमुचितम। प्राथम्यात्तदेव वा वक्तुमुचितम।मम त्वन्तरङ्गपरिभाषया तद्वारणासम्भवात्तन्नोक्तम।

किञ्च सिद्धान्ते नित्यत्वाद् गुणात्पूर्वमूठ्, गुणस्तु ऊठि यणाबाधितत्वादनित्यः। ऊनशब्दमाश्रित्येत्यादिभाष्येण च परिभाषायामङ्गशब्देन सप्तम्याद्यन्ततयोपात्तं शब्दरूपं निमित्तमेव गृह्यत इति स्पष्टमेवोक्तम।

यत्तु कैयटेन तदन्तविधिपक्षे परत्वाद् गुणः प्राप्नोतीत्युक्तम। तत्तु न शब्दमाश्रित्येत्यादिभाष्यासङ्गत्या चिन्त्यम।

वलिलोपेऽन्तरङ्गपरिभाषा न प्रवर्तत इति तु न युक्तम्,।तत्सूत्रे भाष्य एव व्रश्चादिषु लोपातिप्रसङ्गमाशङ्क्ययोपदेशसामर्थ्यान्न। न च 'वृश्चत'इत्यादौ चारितार्थ्यम्, बहिरङ्गतया सम्प्रसारणस्यासिद्धत्वेन पूर्वमेव तत्प्राप्तेरिति भाष्योक्तेः।

यत्तु नलोपस्य षट्संज्ञायामसिद्धत्वात।'पञ्चे'त्यत्र 'न षट्' (4-1-10) इति निषेध इति। तच्चिन्त्यम। नलोपस्य हि पदसंज्ञासापेक्षत्वेन बहिरङ्गत्वं वाच्यम। तच्च न, संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणात।'पञ्चे'त्यत्र निषेधस्तु स्त्रियां यत प्राप्नोति तन्नेति व्याख्यानसामर्थ्येन भूतपूर्वषट्त्वमादायेति बोध्यम।

अत एव कृति तुग्ग्रहणं चरितार्थम। 'वृत्रहभ्या'मित्यादौ पदत्वनिमित्तकत्वेऽपि नलोपस्य बहिरङ्गत्वाभावात। भ्यामः पदसंज्ञानिमित्तत्वेऽपि नलोपस्य तन्निमित्तकत्वाभावात। परम्परया निमित्तत्वमादाय बहिरङ्गत्वाश्रयणे तु न मानम। ध्वनितं चेदं 'नलोपः सुप। (8-2-2) इति सूत्रे भाष्य इति तत्रैव भाष्यप्रदीपोद्योते निरूपितम।

अन्तरङ्गे कर्तव्ये जातं, तत्कालप्राप्तिकञ्च बहिरङ्गमसिद्धमित्यर्थः। व्रश्चादिषु पदसंस्कारपक्षे समानकालत्वमेव द्वयोरिति बोध्यम।

एतेनान्तरङ्गं बहिरङ्गाद् बलीय इति परिभाषान्तरमित्यपास्तम। एनामाश्रित्य विप्रतिषेधसूत्रे भाष्ये तस्याः प्रत्याख्यानाच्च।

अन्तरङ्गशास्त्रत्वमस्या लिङ्गम।

इयं च त्रिपाद्यां न प्रवर्तते, त्रिपाद्या असिद्धत्वात। अस्याञ्च 'वाह ऊठ्' सूत्रस्थमूडग्रहणं ज्ञापकमित्येषा सपादसप्ताध्यायीस्था। अन्यथा सम्प्रसारणमात्रविधानेन लघूपधगुणे 'वृद्धिरेचि' (6-1-88) इति वृद्धौ 'विश्वौह' इत्यादिसिद्धेस्तद्वैयर्थ्यं स्पष्टमेव। सत्यां □ □ □ □ □ □ □ □ □ □ बहिरङ्गसम्प्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्यात।न च 'पुगन्त' (7-3-86) इति सूत्रे निमित्तमिको विशेषणम।अत एव 'भिनत्ती'त्यादौ न गुणः, एवञ्च 'नाजानन्तर्य' (प.51) इति निषेधात्कथं परिभाषाप्रवृत्तिरिति वाच्यम,□ प्रत्ययस्याङ्गांश उत्थिताकाङ्क्षत्वेन तत्रैवान्वयात। पुगन्तेत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गवयवलघूपधारूपेको गुण इति 'इको गुणवृद्धी' (1-1-3) इति सूत्रभाष्यसम्मतेऽर्थे भिनत्तीत्यादावदोषाच्च।

अकारान्तोपसर्गेऽनकारान्ते चोपपदे वहेर्वाहेर्वा ण्विविचावनभिधानान्न स्त एव। वार्यूहेत्यादि तूहतेः क्विपि बोध्यम। धातूनामनेकार्थत्वान्न 'प्रादूहोढ' (6-1-89 वा.-3) इत्यस्यापि प्रवृत्तिः।

न च कार्यकालपक्षे त्रिपाद्यामेतत्प्रवृत्तिर्दुर्वारेति वाच्यम,□ पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्य तन्निरूपितबहिरङ्गत्वाभावात्तया तस्यासिद्धत्वप्रतिपादनासम्भवात।न चानया पूर्वस्यासिद्धत्वादभावेन तं प्रति परासिद्धत्वं 'पूर्वत्र' (8--1) इत्यनेन वक्तुमशक्यमिति वाच्यम,□ एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्यापत्तेः। किञ्च पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तेनाऽऽनुमानिक्या अस्या बाध एवोचितः। अतः कार्यकालपक्षेऽपि त्रिपाद्यामस्या अनुपस्थितिरेव।

अत एव कार्यकालपक्षमेवोक्रम्योक्तयुक्तीरुक्त्वा 'अतोऽयुक्तोऽयं परिहारो' न वा बहिरङ्गलक्षणत्वात'□ इत्युक्तं विसर्जनीयसूत्रे भाष्ये सिद्धान्तिना। त्रिपादीस्थेऽन्तरङ्गे कर्तव्येऽयं परिहारो न युक्त इति तदर्थः। किन्तु वचनमेवाऽऽरब्धव्यमिति तदाशयः।

अत एव 'निगाल्यत' इत्यादौ लत्वार्थं 'तस्य दोषः' इति वचनमेवाऽऽरब्धम। अन्यथान्तरङ्गत्वाण्णिलोपात्पूर्वं वैकल्पिकलत्वे तद्वैयर्थ्यं स्पष्टमेव।

येऽपि लक्ष्यानुरोधात। आनुमानिक्याऽप्यन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्य 'पूर्वत्रे'त्यस्य बाधं वदन्ति, तेऽपि लक्षणैकचक्षुर्भिर्नाऽऽदर्तव्या इति दिक।

अत एव 'ओमाङोश्च' (6-1-95) इत्याङ्ग्रहणं चरितार्थम। तद्धि 'खट्वा+आ+ऊढे'त्यत्र परमपि सवर्णदीर्घं बाधित्वा अन्तरङ्गत्वाद् गुणे कृते वृद्धिप्राप्तौ पररूपार्थम।साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चात खट्वाशब्दस्य समुदायेन योगाद् गुणस्यान्तरङ्गत्वमिति 'सम्प्रसारणाच्च' (6-1-108) इति सूत्रे भाष्ये स्पष्टम। 'एही'त्यनुकरणस्य शिवादिशब्दसम्बन्धे तु नास्य प्रवृत्तिः।

R.S.S. Bhopal Campus

ज्ञापकपर'सम्प्रसारणाच्च' (6-1-108) इति सूत्रस्थभाष्यप्रमाण्येनानित्यं प्रकृतिवदनुकरणमित्यतिदेशमादाय लब्धाङ्त्वे एतदप्रवृत्तेः।

यत्तु- पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन। उपसर्गेण तत्संज्ञक शब्देन, साधनेन कारकेण तत्प्रयुक्तकार्येण च। अत एव 'अनुभूयते' इत्यादौ सकर्मकत्वात कर्मणि लकारसिद्धिरिति। तन्न, क्रियायाः साध्यत्वेन बोधात्साध्यस्य च साधनाकाङ्क्षतया तत्सम्बन्धोत्तरमेव निश्चितक्रियाबोधेन साधनकार्यप्रवृत्युत्तरमेव क्रियायोगनिमित्तोपसर्गसंज्ञकस्य सम्बन्धौचित्यात।अत एव 'सुट्कात पूर्वः' (6-1-135) इति सूत्रे 'पूर्वं धातुरुपसर्गेणे'त्युक्त्वा नैतत सारं'पूर्वं धातुः साधनेन युज्यते पश्चादुपर्गेणे'त्युक्त्वोक्तयुक्त्याऽस्यैव युक्तत्वमुक्तं 'साधनं हि क्रिया निर्वर्तयती'त्यादिना भाष्ये। उपसर्गद्योत्यार्थान्तर्भावेण धातुनैवार्थाभिधानादुक्तेषु कर्मणि लकारादिसिद्धिः। पश्चाच्छ्रोतृबोधाय द्योतकोपसर्गसम्बन्धः।

एवं च अन्तरङ्गतरार्थकोपसर्गनिमित्तः सुट् संकृतीत्यवस्थायां द्वित्वादितः पूर्वं प्रवर्त्तते ततो द्वित्वादि।

अत एव 'प्रणिदापयती'त्यादौ णत्वं 'यदागमाः' (प. 11) इति न्यायेन समाहितं भाष्ये।

अत एव प्रत्येति 'प्रत्ययः' इत्यादिसिद्धिः, अन्यथान्तरङ्गत्वात सवर्णदीर्घे रूपासिद्धिः। यदुपसर्गनिमित्तकं कार्यमुपसर्गार्थाश्रितं विशिष्टोपसर्गनिमित्तत्वात्तदन्तरङ्गम। यत्तु न तथा पूर्वागतसाधननिमित्तकमेवान्तरङ्गम।अत एव 'न धातु' (1-1-4) इति सूत्रे 'प्रेद्ध' इत्यत्र गुणो बहिरङ्ग इति भाष्य उक्तम।

किञ्च पूर्वमुपसर्गयोगे धातूपसर्गयोः समास 'ऐकस्वर्याद्यापत्तिरि'ति 'उपपदमतिङ्' (2-2-19) इति सूत्रे भाष्ये स्पष्टम।

भावार्थप्रत्ययस्यापि पूर्वमेवोत्पत्तिः। अत एव 'णेरध्ययने' (7-2-26) इति निर्देशः सङ्गच्छते। इदं च सामान्यापेक्षज्ञापकम,। भावति।ऽपि पूर्वमुत्पत्तेः। अन्यथा तत्र समासापत्तिः। ति। त्वति।ति निषेधान्न तत्र दोषो यदि भावति।युपसर्गयोगोऽस्तीत्यलम।

यत्तु विशेषापेक्षात्सामान्यापेक्षमन्तरङ्गम। विशेषापेक्षे विशेषधर्मस्याधिकस्य निमित्तत्वात। यथा 'रुदादिभ्यः सार्वधातुके' (7-2-66) इत्यत्र रुदादित्वं सार्वधातुकत्वञ्च। तत्र सार्वधातुत्वज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययस्य प्रत्ययत्वज्ञानं चाऽऽवश्यकमिति यासुडन्तरङ्गः। एतेन यद् 'अनुदात्ति।तः', (1-3-12) इति सूत्रे कैयटेनोक्तम लमात्रापेक्षयाऽन्तरङ्गास्तिबादयो' लकारविशेषापेक्षत्वाद्बहिरङ्गाः स्यादय'

इति तत्परास्तम,। विशेषापेक्षत्वेऽपि तस्य सामान्यधर्मनिमित्तकत्वाभावेन तत्त्वस्य दुरुपपादत्वात,। परनिमित्तकत्वेन स्यादीनां बहिरङ्गत्वाच्चेति। तन्न, विशेषस्य व्याप्यत्वेन व्यापकस्यानुमानेनोपस्थितावपि तस्य निमित्तत्वे मानाभावेनाधिकधर्मनिमित्तकत्वानुपपादनात,।भाष्ये एवं विधान्तरङ्गबहिरङ्गभावस्य क्वाप्यनुल्लेखाच्च।

यत्तु 'मतुप।' (5-2-94) सूत्रे भाष्ये पञ्च गावस्य सन्ति स पञ्चगुरित्यत्र मतुप्प्राप्तिमाशङ्कय प्रत्येकमसामर्थ्यात। समुदायादप्रातिपदिकत्वात। समासा समासेनोक्तत्वादिति सिद्धान्तिनोक्ते 'नैतत्सारमुक्तेऽपि हि प्रत्ययार्थे उत्पद्यते (4-1-88) द्विगोस्तद्धितो यथा 'पाण्ञ्चनापितिरि'ति पूर्वपक्ष्युक्तिर्भाष्ये। द्विगोर्लुगनपत्ये। इति लुग्विधानात्तद्धितार्थद्विगोस्तद्धितो भवति पञ्चगुशब्दश्च द्विगुरिति तदाशयं कैयटः। ततो 'द्वैमातुरः' पाञ्चनापितिः, पञ्चसु कपालेषु संस्कृत इत्यादौ सावकाशद्विगोर्बहुव्रीहिणा प्रकृते परत्वाद्बाध इत्याशयेन नैष द्विगुः, कस्तर्हि ? बहुव्रीहिरिति सिद्धान्तिनोक्ते तमवकाशमजानोऽपवादत्वाद् द्विगुः प्राप्नोतीति पूर्वपक्षी। अन्यपदार्थे, सुबन्तमात्रस्य विधीयमानबहुव्रीहेः संख्यायास्तद्धितार्थे विधीयमानो द्विगुर्विशेषविहितत्वाद् बाधकः प्राप्नोतीति कैयटः। ततः सिद्धान्त्येकदेश्याह, अन्तरङ्गत्वाद् बहुव्रीहिः। काऽन्तरङ्गता ? अन्यपदार्थे बहुव्रीहिर्विशिष्टेऽन्यपदार्थे द्विगुस्तस्मिंश्चास्य तद्धितेऽस्तिग्रहणं क्रियत इति। अधिकास्त्यर्थापेक्षमत्वर्थनिमित्तो द्विगुर्बहिरङ्ग इति कैयट इति। नैषा सिद्धान्त्युक्तिरेतावताप्यपवादत्वाहानेः। अच्सामान्यापेक्षयणो विशिष्टसवर्णाजपेक्षदीर्घेण बाधदर्शनात। किञ्च उक्तरीत्या परत्वेनैव बाधसिद्धेः। किञ्च अत्राधिकापेक्षत्वेनैव बहिरङ्गत्वम। न केवलविशेषापेक्षत्वेनेति नैतद्भाष्यारूढं विशेषापेक्षस्य बहिरङ्गत्वम। अतएव सुबन्तसामान्यापेक्षो बहुव्रीहिस्तद्विशेषापेक्षो द्विगुरितिनोक्तं भाष्ये।

न चार्थकृतबहिरङ्गत्वस्यानाश्रयणादिदमयुक्तम,। एकदेश्युक्तित्वेनादोषात। अत एवास्तिग्रहणं नोपाध्यर्थम,। किन्तु अस्तिशब्दान्मतुबर्थमिति त्वदभिमतं बहिरङ्गत्वमपि द्विगोर्नास्तीति प्रतिपाद्य सिद्धान्तिना 'मत्वर्थे द्विगोः प्रतिषेधो वक्तव्यः' इति वचनेनैतत्सिद्धमित्युक्तम।अत एव 'तदोः सः सौ'(7--106) इति सूत्रेऽनन्त्ययोरिति चरितार्थम। अन्यथा प्रत्ययसामान्यापेक्षत्वेनान्तरङ्गत्वादन्त्यस्यात्वेऽनन्त्यस्यैव सत्वे सिद्धे तद्वैयर्थ्यं स्पष्यमेव।

'पादःपत।' (6-4-130) इति सूत्रे भाष्यकैयटयोरप्येतदन्तरङ्गत्वाभाव एव सूचित इति सुधियो विभावयन्तु।

नन्वेवम् 'असुस्रुवदि'त्यत्र लघूपधगुणादुव्ओऽल्पनिमित्तत्वाभावादुवङ् न स्यादिति चेन्, न। तत्रान्तःकार्यत्वरूपान्तरङ्गत्वसत्त्वात्। अन्तःकार्यत्वञ्च पूर्वोपस्थितनिमित्तकत्वमङ्गशब्दस्य निमित्तपरत्वात्।

इदमन्तरङ्गत्वं लोकन्यायसिद्धमिति मनुष्योऽयं प्रातरुत्थाय शरीरकार्याणि करोति, ततः सुहृदां, ततः सम्बन्धिनाम्। अर्थानामपि जातिव्यक्तिलिङ्गसंख्याकारकाणां बोधक्रमः शास्त्रकृत्कल्पितस्तत्क्रमेणैव च तद्बोधकशब्दप्रादुर्भावः कल्पित इति तत्क्रमेणैव तत्कार्याणीति 'पट्व्ये'त्यादावन्तरङ्गत्वात् पूर्वं पूर्वयणादेशः परयणादेशस्य बहिरङ्गतया असिद्धत्वादित्यनेन 'अचः परस्मिन्'(1-1-57) इति सूत्रे भाष्ये स्पस्टम्।

तदपि युगपत्प्राप्तौ पूर्वप्रवृत्तिनियामकमेव। यथा 'पट्व्ये'त्यत्र पदस्य विभज्यान्वाख्याने, न तु जातस्य बहिरङ्गस्य तादृशेऽन्तरङ्गेऽसिद्धतानियामकम्। प्रागुक्तलोकन्यायेन तथैव लाभादिति 'वाह ऊठ्' (6-4-132) सूत्रे कैयटे स्पष्टम्। अत एव 'वाय्वो'रित्यादौ वलिलोपो यणः स्थानिवत्त्वेन वारितः 'अचः परस्मिन्' इत्यत्र भाष्यकृता। क्रमेणान्वाख्याने तु उक्तोदाहरणे पूर्वप्रवृत्तिकत्वमप्यन्तरङ्गत्वं बहिरङ्गस्यासिद्धत्वमपि निमित्ताभावादप्राप्तिरूपं बोध्यम्।

यत्तु एवं रीत्या पूर्वस्थानिकमप्यन्तरङ्गमिति। तच्चिन्त्यम्, स्राजिष्ठ इत्यादौ विन्मतोर्लुकि टिलोपस्यापवादविन्मतोर्लुक्प्रवृत्त्या जातिपक्षाश्रयणेन वारणप्रयासस्य 'प्रकृत्यैकाच्'(6-4-163) इति सूत्रप्रयोजनखण्डनावसरे भाष्यकृत्कृतस्य नैष्फल्यापत्तेः। त्वदुक्तरीत्या विन्मतोर्लुको बहिरङ्गासिद्धत्वेन अनायासतस्तद्वारणात्।भाष्य ईदृशरीत्या बहिरङ्गासिद्धत्वस्य क्वाप्यनाश्रयणाच्च। परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च।

इयं चोत्तरपदाधिकारस्थबहिरङ्गस्य नासिद्धत्वबोधिकेति 'इति इच एकाचोऽम्'(6-3-68) इति सूत्रे भाष्ये पूर्वपक्ष्युक्तिरिति, सा नादर्तव्या। 'परन्तप' इत्यादावनुस्वारे नासिद्धत्वं मुमस्त्रिपाद्यां तदप्रवृत्तेः।

नव्यमतेऽपि यथोद्देशपक्षाश्रयणेनान्यथासिद्धोदाहरणदानेन तस्य तदुक्तित्वमावश्यकमित्याहुः। आभीयेऽन्तरङ्गे आभीयस्य बहिरङ्गस्य समान्याश्रयस्य नानेनासिद्धत्वमसिद्धत्वादित्यसिद्धवत्सूत्रे भाष्ये स्पष्टम्। एवं सिचिवृद्धेर्येन नाप्राप्तिन्यायेनान्तरङ्गबाधकत्वमूलकं न सिच्यन्तरङ्गमस्तीति 'इको गुण' (1-1-3) इति सूत्रे भाष्ये स्पष्टम्॥50॥

नन्वेम 'अक्षय्यूरि'त्यादौ बहिरङ्गस्योठोऽसिद्धत्वादन्तरङ्गो यण् स्यादत आह-

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥51॥

अत्र 'षत्वतुकोः' (6-1-86) इति सूत्रस्थं तुग्ग्रहणं ज्ञापकम्। अन्यथा 'अधीत्य' 'प्रेत्ये'त्यादौ समासोत्तरं ल्यप्प्रवृत्त्या पूर्वं समासे जाते तत्र संहिताया नित्यत्वाद्

ल्यबुत्यपत्तिपर्यन्तमप्यसंहितयाऽवस्थानासम्भवेनैकादेशे ल्यपि तुगपेक्षया पदद्वयसम्बन्धिवर्णद्वयापेक्षैकादेशस्य बहिरङ्गतयाऽसिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव। पदद्वयसम्बन्धिवर्णद्वयापेक्षं बहिरङ्गमिति 'प्रेद्ध' इत्यादौ गुणो बहिरङ्ग इति ग्रन्थेन 'न धातुलोपः' (1-1-4) इति सूत्रे 'संयोगान्तस्य लोपः' (8-2-23) इति सूत्रे च भाष्ये स्पष्टम।

यत्तु षत्वग्रहणमपि ज्ञापकम्, अन्यथा 'कोऽसिचदि'त्यादौ पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गस्यैकादेशस्यादसिद्धत्वेन षत्वाप्रवृत्तौ किं तेनेति। तन्न, इणः पूर्वपदसम्बन्धित्वेन षत्वस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन उभयोः समत्वात। एकादेशस्य परादित्त्वेनौसिचदित्यस्य पदत्वेन पदादित्वाभावान्न 'सात्पदाद्योः' (8-3-111) इत्यनेन निषेधः। त्रैपादिकेऽन्तरङ्गे कार्यकालपक्षेऽपि बहिरङ्गपरिभाषाया अप्रवृत्तेः पूर्वमुपपादितत्वाच्च।

परिभाषार्थस्तु- अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रक्लृप्तिः। बहिष्पदेन बहिरङ्गम्, तस्य भावो बहिरङ्गत्वम्। तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिः, न प्राप्तिरिति। 'असिद्धं बहिरङ्गमित्युक्त्वा नाजानन्तर्ये इति वक्ष्यामी'ति भाष्योक्त्या तत्रत्यस्यान्तरङ्ग इत्यस्यानुवृत्तिसूचनात्। तेन 'पचावेदमि'त्यादौ न दोषः। अन्तरङ्गस्याच्स्थानिककार्यस्यैत्वस्यान्यानन्तर्यनिमित्तकत्वाभावात।

जातस्य बहिरङ्गस्येत्युक्त्या 'अयजे इन्द्रं धियती'त्यादौ बहिरङ्गदीर्घगुणादेरसिद्धत्वं सिद्धम। अत एव 'इणशीनामाद्गुणः सवर्णदीर्घत्वाच्छचन्तस्यान्तरङ्गलक्षणत्वादि'त्यादि सङ्गच्छते। अत एव 'ओमाङोश्च' (6-1-95) इत्याङ्ग्रहणं चरितार्थम। तद्धि 'शिव+आ+इही'ति स्थिते परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गकार्यत्वेनान्तरङ्गत्वाद् गुणे वृद्धिबाधनार्थम।

न च 'अक्षद्यूरि'त्यत्र यणि कृते ऊठोऽसिद्धत्वाद्वलि लोपापत्तिरिति वाच्यम्, अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये कृते च तस्मिन्नदन्तरङ्गं प्राप्नोति तत्र च कर्तव्ये नासिद्धत्वमिति तदर्थात। असिद्धपरिभाषाया अनित्यत्वेन तद्वारणे त्वस्या वैयर्थ्यम्, तेनैव सिद्धेः।

अत एव 'नलोपःसुप' (8-2-2) इति सूत्रे कृति तुग्ग्रहणं चरितार्थम। अन्यथा 'वृत्रहभ्यामि'त्यादौ बहिर्भूतभ्याम्निमित्तकपदत्वाश्रयत्वेन बहिरङ्गतया नलोपस्यासिद्धत्वेन सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव। मम तु तुक्यजानन्तर्यसत्त्वान्न दोषः।

न चैवं सति 'ह्रस्वस्य पिति' (6-1-71) इति सूत्रस्थभाष्यविरोधः। तत्र हि 'ग्रामणिपुत्र' इत्यत्र 'इको ह्रस्वोऽङ्य' (6-3-61) इति ह्रस्वे कृते तुकमाशङ्क्य ह्रस्वस्य बहिरङ्गासिद्धत्वेन समाहितम। 'नाजानन्यर्ये' इत्यस्य सत्त्वे तत्र तदप्राप्तेरस गतिः

स्पष्टैवेति वाच्यम। तेन भाष्येणास्या अनित्यत्वबोधनात। एतज्ज्ञापकेनान्तरङ्गपरिभाषाया अनित्यत्वबोधनस्यैव न्याय्यत्वात।

अत एव 'अचः परिस्मिन' (1-1-57) इति सूत्रे भाष्ये 'पटु+ई+आ' इत्यत्र परयणादेशस्यानयासिद्धत्वात्पूर्वयणादेशः साधितः। अत एवैषा भाष्ये पुनः क्वापि नोल्लिखिता। अत एवान्तरङ्गपरिभाषामुपक्रम्य विप्रतिषेधसूत्रेऽस्या बहूनि प्रयोजनानि सन्ति, तदर्थमेषा परिभाषा कर्त्तव्या प्रतिविधेयं च दोषेष्वित्युक्तं 'सम्प्रसारणाच्च' (6-1-108) इति सूत्रे भाष्ये। प्रतिविधानञ्च परिभाषाविषयेऽनित्यत्वाश्रयणमेवेति ध्वनितमित्यलम ॥51॥

नन्वेवं 'गोमत्प्रिय' इत्यादौ पदद्वयनिमित्तकसमासाश्रितत्वेन बहिरङ्गं लुकं बाधित्वान्तरङ्गत्वाद्धल्ङ्यादिलोपे नुमादयः स्युरत आह-

अन्तरङ्गानपि विधीन बहिरङ्गो लुग बाधते ॥52॥

अत्र च 'प्रत्ययोत्तरपदयोश्च' (7-2-98) इति सूत्रं ज्ञापकम। त्वत्कृतमित्यादौ लुगपेक्षयान्तरङ्गत्वाद्विभक्तिनिमित्तकेन 'त्वमावेकवचने' (7-2-97) इत्यनेन सिद्धे इदं व्यर्थं सत्तज्ज्ञापकम।

ननु 'तव पुत्रस्त्वत्पुत्रः' इत्यादौ तवममादिबाधनार्थ तदावश्यकमिति चेत,एवं तर्हि अत्रत्यमपर्यन्तग्रहणानुवृत्तिस्तज्ज्ञापिकेति भाष्यकृतः।

युष्मदादिभ्य आचारक्विप तु न, सम्पूर्णसूत्रस्य ज्ञापकतापरभाष्यप्रामाण्यात, ह्रस्वनद्यापः (7-1-54) इति नुड्विधायकसूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारक्विबभावाच्च। एवमेवैकार्थकाभ्यां प्रातिपदिकाभ्यां प्रातिपदिकणिचोप्यनभिधानं बोध्यम एतेन तत्रादेशार्थं प्रत्ययग्रहणं चरितार्थमित्यपास्तम।

ननु मपर्यन्तानुवृत्तिरपि सर्वादेशत्वरणाय चरितार्था। न च 'उत्सर्गसमानदेशा अपवादाः' इति न्यायेनासिद्धवत्सूत्रस्थभाष्यसम्मतेन मपर्यन्तस्यैवादेशे सिद्धे तदनुवृत्तिर्व्यर्थेति वाच्यम, तस्य श्नमकजादौ व्यभिचारादिति चेत, न। श्नमि मित्त्वेन बहुचि पुरस्ताद्ग्रहणेनाकचि प्राक्टेर्ग्रहणेन तस्य बाधेऽप्यत्रोत्सर्गस्य त्यागे मानाभावात।

अत एव 'तस्मिन्नणि च' (4-3-2) इत्यनेन युष्माकाद्यादेशविधानं चरितार्थम। अन्यथा आका।देशमेव विदध्यात। आकि। तवकाद्यादेश योरेतदपवादयोरुक्तन्यायेनान्त्यादेशत्वापत्तिः, अतस्तद्विधानम, इदमेव च तज्ज्ञापकम।

यद्यपि विरोधे बाधकत्वमिति वार्तिकमतेऽयं न्यायो भाष्यकारस्तु विनापि विरोधं सत्यपि सम्भवे बाधकत्वमिच्छतीत्यनभिहितसूत्रस्थकैयटरीत्या नायं नियमः, तथापि युष्माकाद्यादेशविधानज्ञापित उत्सर्गः स्वीक्रियत एवेति प्रकृते न दोषः। एतद्भाष्यमपि तत्स्वीकारे मानम।

एवं च मपर्यन्तानुवृत्तिः 'त्वत्कृतमि'त्यादौ मपर्यन्तस्यादेशविधानार्था। तत्र चान्तरङ्गत्वात् 'त्वमौ' (7-2-97) इत्येव सिद्धे व्यर्था सैतज्ज्ञापिका। ज्ञापिते त्वस्मिन्नेतद्विषये तवादीनामप्राप्तया तदपवादत्वाभावेन मपर्यन्तस्यैवादेशार्थं सा चरितार्थेति तदाशयः।

यत्तु हरदत्तेनान्तरङ्गप्रवृत्तौ प्रत्यय उत्तरपदे च मपर्यन्तासम्भवेन तदनुवृत्तिर्व्यर्था सती ज्ञापिकेत्युक्तं तन्न। अन्तरङ्गाणामप्यवादबाध्यत्वेन तद्विषये तदप्रवृत्तेः।

वस्तुतस्तु इदं ज्ञापकं वार्तिकरीत्यैव, भाष्यरीत्या तु वाचनिक एवायमर्थ इत्याहुः।

इयं 'सुपो धातु' (2-4-71) इति लुग्विषयैवेति केचित्। 'एङ्ह्रस्वात्सम्बुद्धेः' (6-1-69) 'न यासयोः' (7-3-45) इति सूत्रस्थाकरप्रामाण्येन लुग्मात्रविषया। आद्ये 'हे त्रपु' इत्यादावनेन न्यायेन लोपं बाधित्वा लुग्भवतीति भाष्ये उक्तम्।अन्त्येऽन्तरङ्गश्च विधीन। सर्वोऽपि लुग्बाधते न तु सुब्लुगेव। अत एव 'सनीस्रंस' इत्यादौ नलोपो न भवति। पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादावेकादेशात्प्रागेव टापो लुक्। अन्यथा कृतैकादेशस्य लुक्यकारश्रवणं न स्यादिति कैयटे उक्तम्।एतद्विरोधात्यत 'तद्राजस्य' (2-4-62) इति सूत्रे कैयटेनोक्तम्। 'अङ्गानतिक्रान्तोऽत्य।ग' इत्यत्र सुपो लुकि बहुवचनपरत्वाभावात्। 'तद्राजस्य' इति लुग्। न स्यादिति शङ्कापरभाष्यव्याख्यावसरेऽन्तरङ्गानपीति न्यायेनायं लुक्।सुब्लको बाधकः स्यादित्याशङ्क्य सुब्लुक्।एवानेन बलवत्तवं बोध्यत इति तत्प्रौढ्येति द्रष्टव्यम्। लुगपेक्षया लुको बलवत्त्वस्य वक्तुमशक्यत्वादिति तदाशङ्कासमाधानं वक्तुं युक्तम्। अनेन न्यायेनान्तरङ्गनिमित्तविनाशकलुकस्तत्प्रयोजकसमासादीनां च प्राबल्यं बोध्यत इत्यन्यत्र विस्तरः ॥52॥

नन्वेवं सौमेन्द्रेऽन्तरङ्गत्वाद् आद्गुणे पूर्वपदात्।परेन्द्रशब्दाभावेन 'नेन्द्रस्यपरस्य' (7-3-22) इति वृद्धिनिषेधो व्यर्थः। अन्तादिवद्भावस्तूभयत आश्रयणे निषिद्धः। किञ्च वृद्धिरप्यत्र न प्राप्नोत्यन्तादिवत्त्वोभयाभावेऽपि पूर्वान्तवत्त्वेनैकादेशविशिष्टे पूर्वपदत्वेन 'इन्द्र'शब्दस्यैकदेशविकृतन्यायेन 'उभयत आश्रयणे नान्तादिवदि'त्यस्याभावेन तदाश्रयणेन वोत्तरपदत्वेऽपि तस्यानच्कत्वादेकस्यैकादेशेन परस्य नित्येन 'यस्येति' (6-4-148)लोपेनापहारात्।

न च परादिवद्भावेनैकादेशविशिष्टस्योत्तरपदत्वमेवास्त्विति तत्सम्भव इति वाच्यम्,। उत्तरपदाद्यच्स्थानिकत्वाद् वृद्धेस्तदभावेनाप्राप्तेस्तादृप्यानतिदेशात्। अन्यथा 'खट्वाभिरि'त्यादावपि पूर्वान्तवत्त्वेनादन्तत्वे भिस ऐसापत्तिरिति भाष्ये स्पष्टम्।

अत एव 'पूर्वैषुकामशम' इत्यादावन्तरङ्गत्वादाद् गुणे वृद्धिर्न स्यादित्याशङ्कितम्। तदेकदेशमात्रस्य विकाराभावाच्च।

तदुक्तं भाष्ये- 'इन्द्रे द्वावचावेको यस्येति लोपेनापहृतोऽपर एकादेशेन ततोऽनच्क इन्द्रशब्दः सम्पन्नस्तत्र कः प्रसङ्गो वृद्धेरिति'। मरुदाभिरिन्द्रस्य द्वन्द्वे इन्द्रस्यैव पूर्वनिपातोऽत आह-

पूर्वोत्तरपदनिमित्तकार्यात पूर्वमन्तरङ्गोऽप्येकादेशो न ॥53॥

अत्र च 'नेन्द्रस्य' (7-3-22) इति निषेध एव ज्ञापक इति 'अन्तादिवच्च' (6-1-85), 'विप्रतिषेधे परम'(1-4-2) इति सूत्रयोर्भाष्ये स्पष्टम ॥53॥

नन्वेमपि प्रधाय प्रस्थायेत्याधै अनार ङ्गत्वाधित्वादिषु कृतेषु ल्यप स्यादत आह-

अन्तरङ्गानपि विधीन बहिरङ्गो ल्यप बाधते ॥54॥

'अदो जग्धिः' (2-4-36) इति सूत्रेति कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धिः' इत्यत्र भाष्ये स्पष्टम ॥54॥

नन्वेवमपीयायेत्यादौ द्वित्वे कृतेऽन्तरङ्गत्वात सवर्णदीर्घत्वेन तदसिद्धिरत आह-

वार्णादाङ्गं बलीयो भवति ॥55॥

तेनान्तर गमपि सवर्णदीर्घं बाधित्वा वृद्धिरिति तत्सिद्धिः।

'अभ्यासस्यासवर्णे' (6-4-78) इतीयङ्विधायकसूत्रस्थमसवर्णग्रहणमस्या ज्ञापकम तद्धि 'ईषतुरि'त्यादाविय ादिव्यावृत्तयर्थम एतत्परिभाषाभावे तु ईषतुरित्यादावन्तरङ्गेण सवर्णदीर्घेण बाधात्तद्व्यर्थम इय वौ ह्यभ्याससम्बन्धनिमित्तकत्वाद् बहिर गौ। न चेय ादिरपवादो 'येन नाप्राप्ति'न्यायेन 'इयर्ती'त्यादिसकललक्ष्यप्राप्तयणपवादत्वस्यैव निर्णयादिति प्राञ्चः।

परे तु एतत्परिभाषाभावे 'अभ्यासस्य' इति सूत्रमेव व्यर्थम न च 'इयाय' इयेषेत्यादौ चरितार्थम,तयोरपि पूर्वप्रवृत्तगुणस्य पूर्वप्रवृत्तवृद्धेश्च 'द्विर्वचनेऽचि' (1-1-59) इति रूपातिदेशेनापहारे द्वित्वे कृते पुनः प्राप्ते गुणवृद्धीबाधित्वाऽन्तरङ्गत्वात्सवर्णदीर्घापत्तेः। न च 'इयर्ती'त्यादौ तच्चरितार्थम, तावन्मात्रप्रयोजकत्वे ऊरित्येव ब्रुयात य्वोरित्यनुवर्त्तते। 'इणोयण' (6-4-81) इति साहचर्याद् व्याख्यानाच्च ऋधातोरेव ग्रहणम अर्तेरिवर्णस्येयि त्यर्थः। अभ्यासस्यार्तावित्ति अभ्यासस्यार्तेरिति वा गुरुत्वान्न युक्तम

न च 'ए ऐ ओ औ' शब्देभ्य आचारक्विबन्तेभ्यो लिटीय ाद्यर्थं तत्सूत्रमावश्यकम तथा ओणृधातोर्ण्वुलन्तादिच्छाक्यजन्तात्सनि 'उवोणकीयिषतीत्याद्यर्थमावश्यकमिति वाच्यम, षाष्ठप्रथमाद्वि-कान्तस्थभाष्यप्रामाण्येन तेषामनभिधानात अन्त्ये द्वितीयद्विर्वचनस्यैव सत्त्वेन त्वदुक्तप्रयोगस्यैव दुर्लभत्वात एवञ्च सम्पूर्णसूत्रस्य ज्ञापकता युक्ता।

यद्यपि भाष्ये 'यदयमभ्यासस्यासवर्ण इत्यसवर्णग्रहणं करोति'इति ग्रन्थेनासवर्णग्रहणस्यैव ज्ञापकता लभ्यते, तथापि 'न ह्यन्तरेण गुणवृद्धी असवर्णपराभ्यासो भवति' इति तदुपपादनग्रन्थेन सम्पूर्णसूत्रस्यैव ज्ञापकता लभ्यते। अग्रेऽपि नैतदस्ति ज्ञापकमर्त्यर्थमेतत्स्यादित्यनेन सूत्रसार्थक्यमेव दर्शितम। असवर्णग्रहणस्यैव ज्ञापकत्वे तु तव्यावर्त्यप्रदर्शनेन तत्सार्थक्यमेव दर्शितं स्यात।

न च 'अकृतव्यूह' परिभाषया 'इयेषे'त्यादौ सवर्णदीर्घाप्राप्तिर्यदि दीर्घो न स्यात्तर्हि गुणः स्यादिति सम्भावनायाः सत्त्वेन परिभाषाप्रवृत्तेः सूपपादत्वादिति कथं सम्पूर्णसूत्रस्य ज्ञापकतेति वाच्यम, तस्या असत्त्वात। सत्त्वे वैतद्भाष्यप्रामाण्येन यत्रान्तरङ्गकार्यप्रवृत्तियोग्यकालोत्तरमेव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिस्तत्रैव तत्परिभाषाप्रवृत्तिस्वीकाराच्च।

न चान्तरङ्गत्वाद्दीर्घेऽपि 'इयाये'त्यादौ पूर्वान्तवत्त्वेनाभ्यासत्वादिवर्णत्वाच्च णल्यसवर्ण इय्विधानेन सूत्रं चरितार्थम। न च 'अचि श्नु' (6-4-77) इत्यनेन सिद्धिः, वृद्धिबाधनार्थत्वादिति वाच्यम, प्रत्यासत्त्याऽसवर्णपदेनाभ्यासोत्तरखण्डसम्बन्ध्यसवर्णाच एव ग्रहणाच्छास्त्रबाधकल्पनापेक्षया परिभाषाज्ञापकत्वस्यैवौचित्याच्चेत्याहुः।

सा चेयं धर्मिग्राहकमानादाङ्गवार्णयोः समानकार्यित्व एव।

यत्तु समाननिमित्तकत्वरूपसमानाश्रयत्व एवैषेति। तन्न, ज्ञापितेऽपि 'इयायेयेषे'त्याद्यसिद्धेः, सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च। 'स्योन' इत्यत्र तु वक्ष्यमाणरीत्याऽस्या अनित्यत्वादप्रवृत्तौ गुणादन्तरङ्गत्वाद्यणादेशः।

न चैवमपि 'इयाये'त्यादावियङ् दुर्लभः, तत्र कर्तव्ये वृद्धयादेः स्थानिवत्त्वेन असवर्ण इति प्रतिषेधादिति वाच्यम, सूत्रारम्भसामर्थ्यादेव स्थानिवत्त्वाप्रवृत्तेः। तच्च सामान्यापेक्षमभ्यासकार्ये तदुत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकीभूतस्थानिवत्त्वं नेति। अत एव 'आरती'त्यादौ यणादेशस्य स्थानिवत्त्वादभ्यासस्य 'ढ्रलोप' इति दीर्घो दुर्लभ इत्यपास्तम। दीर्घविधौ तन्निषेधाच्च। अरियादित्यत्र तु स्थानिवत्त्वेनेयङ् भवत्येव, तस्य स्थानिवत्त्वस्याभ्यासकार्यप्रतिबन्धकत्वाभावात।

इयं चाङ्गसम्बन्धिन्याङ्ग एवेति 'स्वरितो वा' (8-2-6) इति सूत्रे भाष्ये। तत्र हि-कुमार्यै इत्यादौ यणुत्तरमाङुक्तः। इयं चानित्या 'च्छ्वोः' (1-4-19) इति सतुग्निर्देशात। अन्यथा अन्तरङ्गत्वात प्रूर्वं तुकः शादेशे तुकोऽप्राप्त्या तद्वैयर्थ्यं स्पष्टमेवेत्यन्यत्र विस्तरः ॥55॥

नन्वेवं सेदुष इत्यादौ क्वसोरन्तरङ्गत्वादिटि ततः सम्प्रसारणेऽपीटः श्रवणापत्तिरिति चेत? अत्र केचित-

अकृतव्यूहाः पाणिनीयाः ॥56॥

न कृतो विशिष्ट ऊहो- निश्चयः शास्त्रप्रवृत्तिविषयो यैरित्यर्थः। भाविनिमित्तविनाश इत्यध्याहारः। बहिरङ्गेणान्तरङ्गस्य निमित्तविनाशे पश्चात सम्भावितेऽन्तरङ्गं नेति यावत। अत्र च ज्ञापकं 'समर्थनां प्रथमात' (4-1-82) इति सूत्रे समर्थानामिति। तद्धि सूत्थितादिभ्यः कृतदीर्घेभ्यः प्रत्ययोत्पत्त्यर्थम। अन्यथाऽन्तर-ङ्गत्वाद्दीर्घे कृत एव प्रत्ययप्राप्त्या तद्व्यर्थता स्पष्टैव। तत्र हि भाविन्यादिवृद्धया सवर्णाच्त्वविनाशः स्पष्ट एव।

न चात्रैकादेशप्रवृत्तिसमये वृद्ध्यप्राप्त्यैकादेशे कृत आदेशे वृद्धेः प्राप्तावपि तन्निमित्तविनाशाभाव इति वाच्यम। तद्द्वारैव तन्निमित्तविनाशसत्त्वेनाक्षतेः। न च 'सौत्थितौ' बहिरङ्गतया वृद्धेरसिद्धत्वान्न तन्निमित्तविनाश इति वाच्यम। समर्थग्रहणेनैतद्विषये तस्या अप्रवृत्तेरपि ज्ञापनात।

यत्तु समर्थग्रहणेनान्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इति। तन्न, असिद्धपरिभाषया समकालप्राप्तबहिरङ्गस्य पूर्वं जातबहिरङ्गस्य चान्तरङ्गे कर्तव्येऽसिद्धत्वं बोध्यते, न तु जातेऽन्तरङ्गे तस्य तत्त्वं बोध्यते, मानाभावात। फलाभावाच्च। एवञ्च सूत्थितादावेकादेशस्य परिभाषासाध्यत्वाभावेन तदनित्यत्वज्ञापनासम्भवात।

'अन्तरङ्गानपि विधीन' इत्यादेरप्यस्यामेवान्तर्भावः। एतत्प्रवृत्तौ च निमित्तविनाशसम्भावनापि निमित्तम। अत एव 'गोमद्दण्डी'त्यादौ हल्ङ्यादिलोपो न। अन्यथा हल्ङ्यादिलोपकाले सामासिकलुकोऽप्राप्त्या तदुत्तरं चापहार्याभावादप्राप्त्या लोपस्यैवापत्तेः। अस्ति चात्रापि यदि लोपो न स्यात्तर्हि लुक स्यादिति सम्भावना। 'अल्लोपोऽनः' (6-4-134) इति सूत्रस्थतपरकरणन्तु परिभाषाऽनित्यत्वज्ञापनेन चरितार्थम। तद्धि 'आन' इत्यादौ लोपवारणाय। अन्यथा दीर्घाभावे लोपसम्भावनयैतत्परिभाषाबलाद्दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेत्याहुः।

'समर्थनाम' इति सूत्रे कैयटस्तु समर्थवचनेनेयं परिभाषा ज्ञाप्यते 'अकृतव्यूहाः पाणिनीयाः' इति। तेन 'पपुष' इत्यादावन्तरङ्गत्वात्पूर्वं कृतोऽपीडागमो निवर्तत इति वदन 'न कृतो व्यूहो विशिष्टस्तर्को निमित्तकारणविनाशेऽपि कार्यस्थितिरूपो यैरि'त्यर्थमभिप्रैति। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति यावत सूत्थितादिञि वृद्धौ दीर्घनिवृत्तौ सावुत्थितिर्माभूदिति समर्थानामिति।

लोकन्यायसिद्धश्चायमर्थः। तथा हि लोके निमित्तं द्विविधं दृष्टम कार्यस्थितौ नियामकं तदनियामकञ्च। आद्यं यथा न्यायनयेऽपेक्षाबुद्धिः तन्नाशे द्वित्वनाशाभ्युपगमात वेदान्तिनये प्रारब्धस्य विक्षेपस्थितिनियामकत्वं च प्रसिद्धमेव। द्वितीयं यथा- दण्डादि, तन्नाशेऽपि घटनाशादर्शनात शास्त्रे लक्ष्यानुरोधाद् व्यवस्था।

RSK.S. Bhopal Campus

भाविनिमित्तविनाशे पूर्वमनुत्पत्तौ तु न कश्चिन्न्यायो नापि सम्प्रतिपन्नो दृष्टान्तः। समर्थानामित्यस्यापि लोकसिद्धार्थज्ञापनेन चारितार्थ्यसम्भवे लोकसिद्धापूर्वतादृशार्थज्ञापकत्वे मानाभाव इति तदाशय इति बोध्यम।

परे तु 'सेदुष' इत्यादौ पदावधिकेऽन्वाख्याने 'सेद्वस+अस' इति स्थिते इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वात्पूर्वं सम्प्रसारणे वलादित्वाभावादिटः प्राप्तिरेव नेति तत्सिद्धिरिति स्पष्टं 'समर्थानाम' इति। सूत्रे कैयटे 'असिद्धवत' सूत्रे कैयटे च स्पष्टमेतत। यद्यपि प्रतिपदविधित्वमनवकाशत्वे सत्येव बाधकत्वे बीजम, तथापि पूर्वप्रवृत्तौ सावकाशत्वेऽपि नियामकं भवत्येवेति तदाशयः। निरूपितं चैतद्बहुशः शब्देन्दुशेखरादौ।

'समर्थानाम'इति सूत्रस्थसमर्थग्रहणन्तु 'विषुण' इत्यादावकृतसन्धेः प्रत्ययदर्शनेन सर्वत्र तथा भ्रमवारणाय न्यायसिद्धार्थानुवाद एव। ध्वनितं चेदं 'विप्रतिषेध'सूत्रे भाष्ये। तत्र हि 'वैक्षमाणिरि'त्यन्तरङ्गपरिभाषोदाहरणमुक्तम। किञ्च विभज्यान्वाख्याने 'सु+उत्थित+अस+इ' इति स्थिते 'वार्णादाङ्गं बलीय' इति प्राप्तवृद्धिवारणाय समर्थग्रहणमित्यत्रैव कैयटे स्पष्टम।

अत एव असिद्धवत्सूत्रे ''वसुसम्प्रसारणमञ्विधौ सिद्धं वक्तव्यं 'पपुष' इत्यादौ वसोः सम्प्रसारणे कृते आतो लोपो यथा स्यात' इति भाष्ये उक्तम।पदस्य विभज्यान्वाख्याने पूर्वोक्तकैयटरीत्या पूर्व सम्प्रसारणे इटोऽप्राप्तावुस ।निमित्तक एवाऽऽतो लोप इति तदाशयः। अन्यथाऽन्तरङ्गत्वादिटि तन्निमित्तक एवाऽऽतो लोप इति तदसङ्गतिः।

अत एव 'चौ प्रत्यङ्गस्य प्रतिषेध' इति वचनं वार्तिककृतारब्धं भाष्यकृता च न प्रत्याख्यातम।प्रत्यङ्गमन्तरङ्गम।अस्यां परिभाषायां सत्यां तु तद्वैयर्थ्यं स्पष्टमेव।

अत एव 'च्छ्वोः' (6-4-19) इतिसूत्रे 'अवश्यमत्र तुगभावार्थो यत्नः कार्योऽन्तरङ्गत्वाद्धि तुक प्राप्नोति भाष्ये उक्तम। एतत्सत्त्वे तु तुकोऽप्राप्त्या यत्नावश्यकत्वकथनमसङ्गतमिति स्पष्टमेव। न चैतदनित्यत्वज्ञापनार्थमेव तदिति तदाशयः, अवश्यमत्रेत्यक्षरस्वारस्यभङ्गापत्तेः।

किञ्चानयैव 'प्रत्ययोत्तरपदयोश्च' अदो जग्धिर्ल्यप्ति कितीत्यनयोश्चारितार्थ्येन तज्ज्ञापकवशाल्लुग्ल्य-पोरन्तरङ्गबाधकता भाष्योक्ता भज्येत।

किञ्चैषा भाष्ये न दृश्यते। तदुक्तम।'असिद्धवत' सूत्रे कैयटेन 'निमित्तापाये नैमित्तिकस्याप्यपाय इति परिभाषाया भाष्यकृताऽनाश्रयणादि'ति।

पदसंस्कारपक्षे 'हरिरि'त्यादौ विसर्गे कृते ततो गच्धतीत्यादिसम्बन्धे 'हरिः गच्छती'त्याद्येव साधु। तद्विषये पदसंस्कारपक्षानाश्रयणं वेतिदिक॥56॥

अन्तरङ्गादप्यवादो बलवान ॥57॥

तत्रापवादपदार्थमाह-

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥58॥

प्राप्त इति भावे क्तः। 'येन नाप्राप्त' इत्यस्य यत्कर्तृकावश्यकप्राप्तावित्यर्थः, नञ्द्वयस्य प्रकृतार्थदाढ्र्यबोधकत्वात। एवञ्च विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधः।

तदप्राप्तियोग्येऽचारितार्थ्यं ह्येतस्य बाधकत्वे बीजम।

अत एव 'आयादयः' (3-1-31) इति सूत्रे गोपायिष्यतीत्यादावायादीन बाधित्वा परत्वात स्यादयः प्राप्नुवन्तीत्याशङ्क्य ''अनवकाशा आयादयः। 'गोपायती'त्यादावपि शप्स्यादिः प्राप्नोति। न च सति शप्यसति वा न विशेषः, अन्यदिदानीमिदमुच्यते नास्ति विशेष इति। यदुक्तमायादीनां स्यादिभिरव्याप्तोऽवकाश इति स नास्त्यवकाश'' इति भाष्ये उक्तम।एवमत्र तत्प्रवृत्त्युत्तरं चारितार्थ्येऽपि तदव्याप्तोऽवकाशो नास्तीति सममेव।

किञ्चानेन न्यायेन तत्प्रवृत्त्युत्तरमपि चारितार्थ्ये तद्बाधबोधनम। अन्यथानवकाशत्वेनैव बाधे सिद्धे एतत्कथनवैयर्थ्यापत्तेस्तक्रकौण्डिन्य-न्यायप्रदर्शनस्यापि वैयर्थ्यापत्तेश्च। तथा प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विर्वचनेन बाधः। यथा वा आदेरपि प्रवृत्त्या चरितार्थेन 'आदेःपरस्य' (1-1-54) इत्यनेन 'अलोऽन्त्यस्य' (1-1-52) इत्यस्य बाधः। तदुक्तं 'मिदचोऽन्त्यात' (1-1-47) इति सूत्रे भाष्ये 'सत्यपि सम्भवे बाधनं भवती'ति। अन्यथा 'ब्रह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याये'त्यत्र तक्रदानेन दधिदानस्य बाधो न स्यात तद्दानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसम्भवात।

अत एव विषयभेदेऽप्यपवादत्वम। अत एवाचिरादेशेन नुटोऽप्यपवाद त्वाद्बाधमाशङ्क्य 'न तिसृ' (6-4-4) इति ज्ञापकेन समाहितं तृज्वत्सूत्रे भाष्ये। तेन विषयभेदेऽपवादत्वाभाव एव बोध्यत इति कश्चित। तन्न, विन्मतोर्लुका टिलोपमात्रस्य बाधानापत्तेः।

यत्तु'दयतेर्दिगि' (7-4-9) इति सूत्रे द्वित्वोत्तरं दिग्यादेशस्य चारितार्थ्यं कैयटेनोक्तं तत प्रौढ्या। ध्वनितं च तेनापि तस्य तथात्वं तदुत्तरग्रन्थेन।

'असम्भव एव बाधकत्वं विरोधस्य तद्बीजत्वात' इति वार्तिकमतं तु भाष्यकृता दूषितत्वान्न लक्ष्यसिद्धयुपयोगि।

तक्रकौण्डिन्यन्यायोऽपि तदप्राप्तियोग्येऽचरितार्थविषयो विधेयविषय एव चेति 'तद्धितेष्वचामादेः' (7-2-117), 'धातोरेकाचः (3-1-22) इत्यादिसूत्रेषु भाष्ये स्पष्टम।

क्वचित्तु सर्वथानवकाशत्वादेव बाधकत्वम्, यथा-ऽरामो याडादिबाधकत्वम्।न हि याडादिषु कृतेषु ऽराम।प्राप्नोति, निर्दिश्यमानस्य व्यवधानात्। तत्र स्वस्य पूर्वं प्रवृत्तिरित्येव तेषां बाधः। तत्र बाधके प्रवृत्ते यद्युत्सर्गप्राप्तिर्भवति तदा भवत्येव। यथा तत्रैव याडादयः। अप्राप्तौ तु न। यथा पचेयुरित्यादौ दीर्घबाधके निरवकाश इयादेशे दीर्घाभावः ॥58॥

तदेतत्प्रपठयते-

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति ॥59॥

अपवादशब्दोऽत्र बाधकपरः। तदुक्तं 'गुणो यङ्लुकोः' (7-4-82) इत्यत्र भाष्ये-अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते। अजीगणत। अत्र गणेरीत्वमपवादत्वाद्-हलादिः शेषं बाधते। न गणेरीत्वमपवादत्वाद्हलादिःशेषं बाधते। किं तर्हि ? अनवकाशत्वादिति ग्रन्थेन।

गणरूपाभ्यासान्त्यणस्येत्वमित्यर्थे हलादिः शेषेण तन्निवृत्तौ तदनवकाशमीत्वे तु कृते न तस्य प्राप्तिरन्त्यहलोऽभावात्। अभ्यासविकारेषु बाध्यबाधकभावाभावेन च साधितम्।तस्मिंश्च सति लोपे कृते सामर्थ्याच्छिष्ट-स्यान्त्यस्येत्वमिति न दोषः। न च येन नाप्राप्तिन्यायेनापवादत्वमप्यस्य सुवचम्,तस्य चरितार्थविषयताया उक्तत्वात्।

'इको झल'(1-2-9) इत्यत्र भाष्येऽपि ध्वनितमेतत्।तत्र हि 'अज्झन' (6-4-16) इति दीर्घेण गुणोत्तरं फलाभावेनानवकाशत्वाद् गुणे बाधिते दीर्घोत्तरं गुणः स्याद्दीर्घविधानं तु मिनोतेर्दीर्घे कृते 'सनि मीमा' (7-4-54) इत्यत्र मीग्रहणेन ग्रहणेऽर्थवत्,।तत्र पश्चात्। प्राप्तगुणबाधनार्थम्।इको झल्।इति कित्त्वमित्युक्तम्।अन्यथाऽपवादत्वेन बाधे तद्विषये उत्सर्गाप्रवृत्तेर्भाष्यस्य सूत्रस्य चासङ्गतिरिति स्पष्टमेव।

यत्तु 'काञ्चनी'त्यादावपवादमयङ्विषयेऽप्यण। भवति,क्वचिदपवादविषयेऽपीति न्यायादिति। तन्न 'अण्कर्मणि च' (3-3-12) इति सूत्रस्थभाष्यविरोधात्। तत्र ह्यणः पुनर्वचनमपादविषयेऽनिवृत्त्यर्थं गोदायो व्रजतीत्याद्युक्तम्। काञ्चनीत्यादौ काञ्चनेन निर्मितेत्यर्थे शैषिकोऽण बोध्यः।

अत्रेदं बोध्यम्-'येन नाप्राप्ते'त्यत्र येनेस्यस्य यदि स्वेतरेणेत्यर्थस्तदा स्वविषये स्वेतरत्। यद्यत्। प्राप्नोति तद्बाध्यम्,। विध्यन्तराप्राप्तविषयाभावात्। इयमेव बाध्यसामान्यचिन्तेति व्यवह्रियते। अनवकाशत्वेन बाधेऽप्येषा वक्तुं शक्या यद्युदाहरणमस्ति विनिगमनाविरहात्।

यदि तु येनेत्यस्य लक्षणेनेत्यर्थः कार्येणेत्यर्थो वा तदा बाध्यविशेष चिन्ता। अनवकाशत्वेन बाधेऽप्येतद्बाधेन सार्थक्यमुत तद्बाधेनेत्येवं विशेषचिन्ता सम्भवति यद्युदाहरणमस्ति ॥59॥

RSK.S. Bhopal Campus

तत्र कार्येणेत्यर्थे पररूपत्वावच्छिन्ने कार्ये आरभ्यमाणाया वृद्धेस्तद्बाधकत्वे निर्णीते किं शास्त्रविहितस्येत्येवं तद्विशेषचिन्तायामाह-

पुरस्तादपवादा अनन्तरान विधीन बाधन्ते नोत्तरान ॥60॥

अवश्यं स्वपरस्मिन बाधनीये प्रथमोपस्थितानन्तरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः। आकाङ्क्षाया निवृत्तेर्विप्रतिषेधशास्त्रबाधे मानाभावाच्चेत्येतस्य बीजम ॥60॥

'नासिकोदरौष्ठजङ्घादन्त' (4-1-55) इत्यस्यौष्ठ्यांशे ीष्निषेधत्वावच्छिन्नबाधकत्वे निर्णीते किंविहितस्येत्याकाङ्क्षायामाह-

मध्येऽपवादाः पूर्वान विधीन बाधन्ते नोत्तरान ॥61॥

तेन ओष्ठादिषु पञ्चसु 'असंयोगोवधात' इति प्रतिषेध एव बाध्यते, न तु 'सहनञ्विद्यमान' (4-1-57) लक्षण इति 'नासिकोदर' (4-1-55) इत्यत्र भाष्ये स्पष्टम पूर्वोपस्थितबाधेन नैराकङ्क्ष्यमस्या बीजम ॥61॥

ननु 'वा छन्दसि' (3-4-88) इत्यनेन 'सेर्ह्यपिच्च' (3-4-87) इत्यनन्तरस्यापित्त्वस्येव हेरपि विकल्पः स्यात तथा 'नेटि' (7-2-4) इति निषेधोऽनन्तरहलन्तलक्षणाया इव सिचिवृद्धिमृजिवृद्धयोरपि स्यात अत उक्तन्यायमूलकमेवाह-

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ॥62॥

अत एव 'संख्याव्ययादेः' (4-1-26) इति ीब्ग्रहणं चरितार्थम तद्ध्यनन्तरस्य ीषो विध्यभावाय। 'न क्तिचि' (6-4-39) इति सूत्रे दीर्घग्रहणञ्च चरितार्थम तद्ध्यनन्तरस्य 'अनुदात्तोपदेश' (6-4-37) इत्यस्यैव निषेधाभावाय। मध्येऽपवादन्यायाद्यपेक्षयानन्तरस्येति न्यायः प्रबल इति 'अष्टाभ्य' (7-1-21) इति सूत्रे कैयटः।

प्रत्यासत्तिमूलकोऽयम लक्ष्यानुरोधाच्च व्यवस्थेत्यपि पक्षान्तरम तत्र तत्र क्वचित स्वरितत्वप्रतिज्ञासामर्थ्येन बाध्यतेऽयं न्यायः। 'टिड्ढ' (4-1-15) इति सूत्रेण डापा व्यवहितस्यापि ीपो विधिः। 'न षट्' (4-1-10) इत्यादिना द्वयोरपि टाबीपोः प्रतिषेधः। इयञ्च 'शि सर्वनामस्थानम' (1-1-42) इत्यादौ भाष्ये स्पष्टेत्यन्त्र विस्तरः॥63॥

ननु दधतीत्यादावन्तरङ्गत्वादन्तादेशेऽल्विधौ स्थानिवत्त्वाभावाददादेशो न स्यादिति तद्वैयर्थ्यापत्तिरत आह-

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः॥63॥

लक्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चय उत्सर्गेण तत्तल्लक्ष्यं संस्करोति। अन्यथा विकल्पापत्तिरित्यर्थः। अभिनिविशन्त इत्यस्य

बुद्धयारूढा भवन्तीत्यर्थः। 'अपवादो यद्यन्यत्र चरितार्थः' इति न्यायस्य तु नात्र प्राप्तिरन्तादेशाप्राप्तिविषये चारितार्थ्याभावात॥63॥

लक्ष्यैकचक्षुष्कस्तु तच्छास्त्रपर्यालोचनं विनाप्यवादविषयं परित्यज्योत्सर्गेण लक्ष्यं संस्करोति, तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकप्रयोग एव धर्मोत्पत्तेः। तदाह-

प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते॥64॥

तत इत्यस्यापवादशास्त्रपर्यालोचनात। प्रागपीत्यर्थः। प्रकल्प्येत्यस्य परित्यज्येत्यर्थः। अतएव प्रातिपदिकार्थसूत्रे भाष्ये 'इदं द्वयमप्युक्त्वा न कदाचित्तावदुत्सर्गो भवत्यपवादं तावत प्रतीक्षत इत्यर्थकमुक्तम॥64॥

एतन्मूलकमेव नवीनाः पठन्ति-

उपसञ्जनिष्यमाणनिमित्तोऽप्यवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधत इति॥65॥

यत्तु अभ्यस्तसंज्ञासूत्रे कैयटेन प्रकल्प्य चेति प्रतीकमुपादाय यथा 'न सम्प्रसारणे' (6-1-37) इति परस्य यणः पूर्व सम्प्रसारणं, पूर्वस्य तु तन्निमित्तः प्रतिषेध इत्युक्तम,तत्तु तत उत्सर्ग इत्याक्षरार्थाननुगुणम।

यत्तु अपवादवाक्यार्थं बिना नोत्सर्गवाक्यार्थ इति तदर्थ इति, तन्न। अभिनिविशतेऽपवादविषयमित्यादिपदस्वारस्यभङ्गापत्तेः, पदजन्यपदार्थोपस्थितौ वाक्यार्थबोधाभावे कारणा-भावाच्च। यत्र त्वपवादो निषिद्धस्तत्रापवादविषयेऽप्युत्सर्गः प्रवर्त्तत एव। यथा वृक्षावित्यत्र 'नादिचि' (6-1-104) इति पूर्वसवर्णदीर्घनिषेधादप्रवर्तमानस्य वृद्धिबाधकत्वाभावाद् वृद्धिः प्रवर्त्तते। अत एव 'तौ सत' (3-2-127) इत्यादि सङ्गच्छते। अत एव निर्देशाद् भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणम। ध्वनितं चेदम। 'इको गुण' (1-1-3) इति सूत्रे भाष्य इति भाष्यप्रदीपोद्योते निरूपितम।

अत्र देवदत्तस्य हन्तरि हते देवदत्तस्योन्मज्जनं नेति न्यायस्य विषय एव नास्ति। हते देवदत्त उन्मज्जनं न, देवदत्तहननोद्यतस्य हनने तु भवत्येवोन्मज्जनम।प्रकृतेऽपि न पूर्वसवर्णदीर्घेण वृद्धेर्हननं किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रम,प्रसक्तस्यैव निषेधात।

प्रतिपदोक्तत्वमपि निरवकाशत्वे सत्येव बाधप्रयोचकम।स्पष्टं चेदं 'शेषाद्विभाषा' (5-4-144) इति सूत्रे भाष्ये। तत्र हि शेषग्रहणमनर्थकं ये प्रतिपदं विधीयन्ते ते बाधका भविष्यन्तीत्याशङ्क्य, 'अनवकाशा हि विधयो बाधका भवन्ति, समासान्ताश्च कबभावे सावकाशा' इत्युक्तम। क्वचिदनवकाशत्वाभावेऽपि परनित्यादिसमवधाने शीघ्रोपस्थितिकत्वेन पूर्वप्रवृत्तिप्रयोजकं बलवत्त्वं प्रतिपदविधित्वेनापि। परनित्यान्तर-गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथःप्रसङ्गे परबलीयस्त्वमिति 'प्रत्ययोत्तरपदयोश्च' (7-2-98) इति सूत्रे कैयटेन पाठात। अत एव रमे इत्यादौ

प्रतिपदोक्तत्वात। पूर्वमेत्वे आकारप्रश्लेषाद्धल्।यादिलोपो न प्राप्नोतीत्याशङ्क्य 'एङ्ह्रस्वात्'(6-1-69) इति लोपेन समाहितम॥65॥

ननु अयजे 'इन्द्रमि'त्यादावन्तरङ्गस्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यादत आह-

अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते ॥66॥

निरवकाशत्वरूपस्य बाधकत्वबीजस्याभावात। एवं च प्रकृतेऽन्तरङ्गेण गुणेन सवर्णदीर्घः समानाश्रये चरितार्थो यण्गुणयोरपवादोऽपि बाध्यते। पूर्वोपस्थितनिमित्तत्वरूपान्तरङ्गत्वविषय इदम।

यत्तु आगमादेशयोर्न बाध्यबाधकभावः, भिन्नफलत्वात।अत एव 'ब्राह्मणेभ्यो दधि दीयतां कम्बलः कौण्डिन्याये'त्यादौ कम्बलदानेन न दधिदानबाध इति 'च्छ्वोः' (6-4-19) इति सूत्रे कैयटः। तन्न, अपवादो नुग्दीर्घत्वस्येति 'दीर्घोऽकितः' (7-4-83) इति सूत्रस्थभाष्यविरोधात॥66॥

ननु 'अजीगणदि'त्यादौ गणेरीत्वं निरवकाशत्वाद्धलादिः शेषं बाधेत तत्राह-

अभ्यासविकारेषु बाध्यबाधकभावो नास्ति॥67॥

'दीर्घोऽकितः' (7-4-83) इत्यकिद्ग्रहणमस्या ज्ञापकम। अन्यथा यंयम्यत इत्यत्र नुकि कृतेऽनजन्तत्वाद्दीर्घाप्राप्त्या तद्वैयर्थ्यं स्पष्टमेव।

इयं परान्तटङ्गादिबाधकानामप्यबाधकत्वबोधिका। तेन अचीकरत, मीमांसत इत्यादि सिद्धम।आद्ये सन्वद्भावस्य परत्वाद्दीर्घेण बाधः प्राप्नोति। अन्त्ये 'मान्बध' (3-1-6) इति दीर्घेणान्तरङ्गत्वादित्वस्य बाधः प्राप्तः।

यत्तु यत्रैकप्रवृत्त्युत्तरमपि सर्वेषां प्रवृत्तिस्तत्रैवेदमिति अत 'एक' (6-4-120) इति सूत्रे कैयटः, तन्न। नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविदरोधान्मान्बधादीनां दीर्घे कृते इत्त्वाप्राप्त्या 'गुणो यङ्लुकोः' (7-4-82) इति सूत्रस्थभाष्योक्तदुदाहरणासङ्गतेश्चेत्यन्यत्र विस्तरः॥67॥

ननु तच्छीलादितृन्विषये ण्वुलपि स्यात? न च तृन्नपवादः, असरूपापवादस्य विकल्पेन बाधकत्वात।अत आह-

ताच्छीलिकेषु वासरूपविधिर्नास्ति॥68॥

ण्वुलि सिद्धे 'निन्दहिंस' आदि (3-2-146) सूत्रेणकाज्भ्यो वुञ्विधानमत्र ज्ञापकम, तत्र ण्वुल्वुञोः स्वरे विशेषाभावात। ताच्छीलिकेष्विति विषयसप्तमी। तेन ताच्छीलिकैरताच्छीलिकैश्च वासरूपविधिर्नेति बोध्यम।

नन्वेवं 'कम्रा कमने' त्याद्यसिद्धिः 'नमिकम्पि' (3-2-167) इति रेण 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युचो बाधादिति चेत,□न। 'सूददीपदीक्षश्च' (6-2-153) इत्यनेन दीपेर्युज्निषेधे-नोक्तार्थस्यानित्यत्वात॥68॥

नन्वेवं 'हसितं छात्रस्य हसनमि'त्यादौ घञ,□ 'इच्छति भोक्तमि'त्यत्र लिङ्लोटौ 'ईषत्पानः सोमो भवते'त्यत्र खल ॥प्नोतीत्यत आह-

क्त्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति॥69॥

इदं च वाऽसरूपविधेरनित्यत्वात ॥सिद्धम□तदनित्यत्वे ज्ञापकं च 'अर्हे कृत्यतृचश्च' (3-3-169) इति। तत्र हि चकारसमुच्चितलि□ा कृत्यतृचो बाधो मा भूदिति कृत्यतृज्ग्रहणं क्रियत इत्यन्यत्र विस्तरः। वाऽसरूपसूत्रे भाष्ये स्पष्टैषा॥69॥

ननु 'श्वः पक्ते'त्यत्र वासरूपविधिना लृडपि प्राप्नोति, कृत आदेशे वैरूप्यादत आह-

लादेशेषु वाऽसरूपविधिर्नास्ति॥70॥

आदेशकृतवैरूप्यवत्सु लकारेषु स नास्तीत्यर्थः। अत्र च 'हशश्वतोर्लङ्ग च' (3-2-116) इति लङ्विधानं ज्ञापकम□ अन्यथा 'परोक्षे लिट्' (3-1-115) इति लिटा ल□ः समावेशोऽसारूप्यात्सिद्ध इति किं लङ्विधानेन ? शत्रादिभिस्ति□ां समावेशार्थं शतृविधायके विभाषाग्रहणानुवृत्तिः 'लिटः कानज्वा' (3-3-106) इति वाग्रहणं च कृतम□ तज्ज्ञापयति वासरूपसूत्रेऽपवाद आदेशत्वानाक्रान्तः प्रत्यय एव गृह्यत इति कैयटादौ ध्वनितम□ तत्फलं तु सदादिभ्यो भूतसामान्ये लिटा क्वसुरेव, न तु पक्षे तिङ् इति बोध्यम॥70॥

ननु '□मो ह्रस्वात□ (8-3-32) इत्यादौ □मः परस्याचोऽचि परतो □म इति वेति सन्देहः स्यादत आह-

ऽभयनिर्देशे पञ्चमीनिर्देशो बलीयान॥71॥

अचीति सप्तमीनिर्देशस्य 'मयऽञ□ (8-3-33) इत्युत्तरत्र चारितार्थ्यात□ पञ्चमीनिर्देशोऽनवकाश इति 'तस्मादित्युत्तरस्य' (1-1-67) इत्यस्यैव प्रवृत्तिः।

यत्र तु '□ः सि धुट्' (8-3-29) इत्यादावुभयोरप्यचारितार्थ्यं तत्र 'तस्मिन्निति' (1-1-66) सूत्रापेक्षया 'तस्मादित्युत्तरस्य' (1-1-67) इत्यस्य परत्वात्तेनैव व्यवस्था। एवमुभयोश्चारितार्थ्येऽपि। यथा ' आमि सर्वनाम्नः' (7-1-52) इत्यादौ। तत्रामीति सप्तमी 'त्रेस्त्रयः' (7-1-50) इत्यत्र चरितार्थ। आदिति पञ्चम्यात□जसेरसुगि'त्यत्र चरितार्थेति स्पष्टं 'तस्मिन□इति सूत्रे भाष्ये कैयटे च॥71॥

रक्ति बाधबीजनामकं द्वितीयं प्रकरणम□

R.S.K.S. Bhopal Campus

अथ शास्त्रशेषनामकं तृतीयं प्रकरणम ।

ननु 'अतः कृकमि' (8-3-46) इति सत्वमयस्कुम्भीत्यत्र न स्यात, कुम्भशब्दस्यैवोपादानादत आह-

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम ॥72॥

सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिङ्गबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणं बोध्यम ।अपिना केवलस्यापीत्यर्थः।

अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थे 'कुमारः श्रमणादिभिः' (2-1-70) इति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः। स्त्रीप्रत्ययविशिष्टश्रमणादिभिश्च कुमारीशब्दस्यैव सामानाधिकरण्यं न तु कुमारशब्दस्येति तदेतज्ज्ञापकम ।

इयं च 'द्विषत्परयोः' (3-2-39) इत्याद्युपपदविधौ, समासान्तविधौ, महदात्त्वे, ञ्नित्स्वरे राजस्वरे ब्राह्मणकुमारयोः, 'बह्वोर्नञ्वदुत्तरपदभूम्नि' (6-2-175) इत्यादौ समाससङ्घातग्रहणेषु च न प्रवर्त्तत इति ङ्याप्सूत्रे भाष्ये स्पष्टम ।विभक्तिनिमित्तककार्ये च नेत्यपि तत्रैव। तत्र समासान्तविधाववयवग्रहणं एव न, समाससङ्घातग्रहणे तु प्रवर्त्तत एव, स्वरविधावेव समाससङ्घातग्रहणे तत्र दोषोक्तेः। 'बहुव्रीहेरूधसः' (4-1-25) इति सूत्रस्थभाष्याच्च।

एतावस्तु एवानित्यत्वादप्रवृत्तिदोषाः खल्वपि साकल्येन परिगणिता इति भाष्योक्तेः।

नन्वेवं 'बहुव्रीहेरूधसो ीष' (4-1-25) इति सूत्रस्थभाष्यासङ्गतिः। तत्र हि कुण्डोध्नीत्यत्र 'नयृतश्च' (5-4-153) इति कबापादितो नयन्तबहुव्रीहेरित्यर्थात । नयन्तस्य बहुव्रीहित्वाभावात्तदसङ्गतिः, नयन्तानां यः समास इत्यर्थेन च परिहृतम । नयन्तप्रकृतिकसुबन्तोत्तरपदकः समास इति चेत, न। अनया परिभाषया स्त्रीप्रत्ययसमभिव्याहारे तद्रहिते दृष्टानां प्रातिपदिकत्वतद्वयाप्यधर्माणां विशिष्टेऽपि पर्यासत्वमतिदिश्यत इत्याशयात ॥72॥

नन्वेवं 'यूनःपश्ये'त्यत्रेव 'युवतीः पश्ये'त्यात्रापि 'श्वयुव'(6-4-133) इति सम्प्रसारणं स्यादत आह-

विभक्तौ लिङ्गविशिष्टग्रहणम ॥73॥

स्पष्टा चेयं 'युवोरनाकौ' (7-1-1)इत्यत्र भाष्ये। घटघटीग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वात्तन्मूलैषेत्यन्ये॥73॥

ननु 'तस्यापत्यम' (4-1-92) इत्येकवचननपुंसकाभ्यां निर्देशाद् 'गाग्यो, गार्ग्यावि'त्याद्ययुक्तमत आह-

सूत्रे लिङ्गवचनतन्त्रम॥74॥

'अर्धं नपुंसकम'(2-2-2) इति नपुंसकग्रहणमस्या ज्ञापकम। नित्यनपुंसकत्वार्थं तु न तदित्यन्यत्र निरूपितम।

धान्यपलालन्यायेन नान्तरीयकतया तयोरुपादानमिति 'तस्यापत्यम'इत्यत्र भाष्ये स्पष्टम।

अत एव 'आकडार'सूत्रे एकेति चरितार्थमित्यन्यत्र विस्तरः॥74॥

ननु 'भृशादिभ्यो भुव्यच्वेः' (3-1-12) इत्यादौ विधीयमानः क्यङ्, क्व दिवा भृशा भवन्तीत्यत्रापि स्यादत आह-

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥75॥

नञ्युक्तमिवयुक्तं वा यत्किञ्चिद् दृश्यते तत्र तस्माद्भिन्ने तत्सदृशेऽधिकरणे द्रव्ये कार्यं विज्ञायते, हि यतस्तथार्थगतिरस्ति। नहि 'अब्राह्मणमानये'त्युक्ते लोष्टमानीय कृती भवति। अतश्च्व्यन्तभिन्ने च्व्यन्तसदृशेऽभूततद्भावविषये क्यङिति नोक्तदोषः।

'ओषधेश्च विभक्तावप्रथमायाम' (6-3-132) इत्यादौ विभक्तिग्रहणं ह्येतन्न्यायसिद्धार्थानुवाद एव। एतेन विभक्तावित्याद्यस्यानित्यत्वे ज्ञापकमिति वदन्तः परास्ताः, अनित्यत्वे भाष्सम्मतफलाभावात। अत एव 'अकर्तरि च' (3-3-19) इति सूत्रे कारकग्रहणं भाष्ये प्रत्याख्यातमिति बोध्यम। स्पष्टा चेयं 'भृशादिभ्यः' (3-1-12) इति सूत्रे भाष्ये।

अत्र अन्यसदृशेत्युक्त्या सादृश्यस्य भेदाघटितत्वं सूचयति। निरूपितं चैतन्मञ्जूषायाम॥75॥

ननु 'व्याघ्री, कच्छपी'त्यादौ सुबन्तेन समासात्ततोऽप्यन्तरङ्गत्वाट्टाप्यदन्तत्वाभावाज्जतिलक्षणो ीष स्यादत आह-

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः॥76॥

'उपपदम' (2-2-19) इति सूत्रेऽतिङ्ग्रहणेन 'कुगति' (2-2-18) इत्यत्र तदपकर्षणेनाति न्तश्च समास इत्यर्थात्तयोः सूत्रयोः 'सुप्सुपा' इत्यस्य निवृत्त्यैकदेशानुमत्या कारकांशे च सिद्धेयम। तेनाश्चक्रीतीति सिद्धा। अन्यथा पूर्व टाप्यदन्तत्वाभावात क्रीतात करणपूर्वात(4-1-50) इति ीष स्यात।

अस्या अनित्यत्वात क्वचित सुबुत्पत्त्यनन्तरमपि समासो, यथा 'सा हि तस्य धनक्रीते'ति।

अन्ये तु, अनित्यत्वे न मानम,तत्र अजादित्वाट्टाबित्याहुः। अत एव कुम्भकार इत्यादौ षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव। षष्ठीसमासाभावे चोपपदसमासकृत एकार्थीभाव इति न तत्र वाक्यमिति भाष्ये स्पष्टम। तत्र हि- 'षष्ठीसमासादुपपदसमासो

RSK.S. Bhopal Campus

विप्रतिषेधेने'ति वार्तिकम। अथवा 'विभाषा षष्ठीसमासो यदा न षष्ठीसमासस्तदोपपदसमास' इति तत प्रत्याख्यानञ्च।

यद्यप्युपपदसमासस्यान्तरङ्गत्वाभिप्रायकं 'न वा षष्ठीसमासाभावादुपपदसमास' इति वार्तिककृतोक्तं, तथापि तदुभयप्रत्याख्यानपरम अथवेत्यादि भाष्यम। परिभाषायां सामान्यतः कारकोपादानेन कारकविभक्तयन्तेन कृद्भिः समासमात्रस्य सुबुत्पत्तेः पूर्वमेव लाभात।

एतेनैषां कारकतद्विशेषयोरुपादान एवेति परास्तम,अस्या विध्येकवाक्यत्वाभावेन विप्रतिषेधादिशास्त्रवत्कार्यव्यवस्थापकत्वेनोपादान एवेत्यर्थालाभाच्च॥76॥

ननु 'उगिदचाम' (7-1-70) इत्यत्र धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमेनाधातोरेव नुमि सिद्धेऽधातुग्रहणं व्यर्थमत आह-

साम्प्रतिकाभावे भूतपूर्वगतिः॥77॥

तत्तद्वचनसामर्थ्यन्यायसिद्धेयम। तत्सामर्थ्यादधातुभूतपूर्वस्यापीत्यर्थेन गोमत्यतेः क्विपि गोमानित्यादौ नुम्सिद्धिः। 'नामि' (6-4-3) इत्यादिसूत्रेषु भाष्ये स्पष्टा॥77॥

बहुव्रीहौ तद्गुणसंविज्ञानमपि॥78॥

अपिनाऽतद्गुणसंविज्ञानम। एषां गुणानामवयवपदार्थनां संविज्ञानं विशेष्यान्वयित्वमिति तदर्थः। यत्र समवायसम्बधेन सम्बन्ध्यन्यपदार्थस्तत्र प्रायस्तद्गुणसंविज्ञानम,अन्यत्र प्रायोऽन्यत। 'लम्बकर्णचित्रगू' उदाहृणे, 'सर्वादीनि' (1-1-27) 'जक्षित्यादयः' (6-1-6) इति चोदाहरणे। सर्वनामसंज्ञासूत्रे भाष्ये स्पष्टा॥78॥

ननु 'वदःसुपि क्यप च' (3-1-106) इति चेनानुकृष्टस्य यतो 'भुवो भावे' (3-1-107) इत्यत्राप्यनुवृत्तिः स्यादत आह-

चानुकृष्टं नोत्तरत्र॥79॥

णमुल्यनुवर्तमाने 'अव्ययेऽयथाभिप्रेत' (3-4-59) इति सूत्रे पुनर्णमुल्ग्रहणमस्या ज्ञापकम। अन्यथा क्त्वा चेति वदेत। तद्धि उत्तरत्रोभयोः सम्बन्धार्थम। उदाहरणानि स्फुटानि।

इदनित्यम। अत एव 'तृतीया च होः' (2-3-3) इत्यत्र चानुकृष्टाया अपि द्वितीयाया 'अन्तरान्तरेण' (2-3-4) इत्यत्र सम्बन्धः।

'लुटि च क्लृपः' (1-3-93) इति सूत्रस्थेनानुवृत्त्यर्थकसकलचकारप्रत्याख्यानेन विरुद्धेयम। व्याख्यानादेवानुवृत्तिनिवृत्योनिर्वाह इति तदाशयः। 'कुलिजाल्लुक्खौ च' (5-1-55) इति सूत्रस्थभाष्यविरुद्धा च। तत्र हि- 'द्विगोःष्ठंश्च' (5-1-54) इति सूत्रात ष्ठनस्तत्र चेनाप्यनुकृष्टस्य 'खोऽन्यतरस्याम' इत्यस्य चानुवृत्तिं स्वीकृत्य 'लुक्खौ च' इति भाष्ये प्रत्याख्यातम॥79॥

RSK.S. Bhopal Campus

नन्वनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोतीत्यत आह-

स्वरविधौ व्यञ्जनमविद्यमानवत्॥80॥

स्वरोद्देश्यके विधावित्यर्थः। 'नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु' (6-2-142) इति सूत्रे पृथिव्यादिपर्युदासोऽस्या ज्ञापकः, अन्यथा पृथिव्यादीनामनुदात्तादित्वाभावादप्राप्ता तद्वैयर्थ्यं स्पष्टमेव।

धर्मिग्राहकमानादेव च स्वराद्देश्यकविधिविषयमिदम्।अत एव 'शतुरनुमो नद्यजादी' (6-1-173) 'अचः कर्तृयकि' (6-1-195) इत्यादावजादी अच इत्यादेश्चारितार्थ्यम्।अत एव 'राजवती'त्यादौ नलोपस्यासिद्धत्वादन्वतीशब्दत्वात्।'अन्तोऽवत्याः' (6-1-220) इति स्वरो न 'उदश्वित्वानि'त्यत्र 'ह्रस्वनुड्भ्याम्'।(6-1-176) इति मतुबुदात्तत्वं च नेत्याकरः। स्पष्टं चेदं 'समासस्य' (6-1-223) इति सूत्रे भाष्ये।

'उच्चैरुदात्तः' (1-2-29) इति सूत्रे कैयटस्त्विवयमनावश्यकी, समभिव्याहृताजुपरागेण हलोऽप्युदात्तादिवदवभासात्तदुपपत्तेरित्याह। तत्र भाष्येऽपि ध्वनितमेतत॥80॥

नन्वेवमपि राजदृषदित्यादौ 'समासस्य' (6--223) इत्यन्तोदात्तत्वं षकारस्य न स्यादत आह-

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्॥81॥

अस्याश्च 'यतोऽनावः' (6-1-213) इति सूत्रेऽनौप्रतिषेधो ज्ञापकः। 'नाव्यमि'त्यत्रादिर्नकारो न स्वरयोग्यो यश्चकारस्तद्योग्यो नासावादिरिति स प्रतिषेधोऽनर्थकः। न चादिरेव नकार उदात्तगुणविशिष्टान्तरतमाञ्ज्रूपोऽस्त्विति वाच्यम, तथा सति निमित्तभूतद्वयच्कत्वस्य विनाशादुपजीव्य विरोधेनाद्युदात्तत्वाप्राप्तेरित्यन्यत्र विस्तरः। स्पष्टा चेयं 'समासस्य' (6-1-223) इति सूत्रे भाष्ये॥81॥

ननु 'पूरणगुण' (2-2-11) इति निषेधस्तव्यत्यपि स्यात्। 'दिव औत्'। (7-1-84) इत्यौत्वं दिवेः क्विप्यपि स्यात्। तथा 'यतोऽनावः' (6-1-213) इति स्वरो ण्यत्यपि स्यात्।'ऋदृशोऽ गुणः' (7-4-16) इति चङ्यपि स्यात्।अत आह-

निरनुबन्धग्रहणे न सानुबन्धकस्य॥82॥

तदनुबन्धकग्रहणे नातदनुबन्धकस्य॥83॥

'वामदेवाड्ड्यड्ड्यौ' (4-2-9) इति सूत्रे ड्यड्यतोर्डित्वमनयोर्ज्ञापकम्। तद्धि-'ययतोश्चातदर्थ' (6-1-156) इत्यत्र तयोरग्रहणार्थम्। नञः परस्य ययदन्तस्योत्तरपदस्यान्त उदात्त इति तदर्थः। एवञ्चावामदेव्येऽव्ययपूर्वपदप्रकृतिस्वर एव भवति।

RSK.S. Bhopal Campus

तन्मात्रानुबन्धकग्रहणे स चान्यश्चानुबन्धो यस्य तद्ग्रहणं नेत्यन्त्यार्थः। एते च प्रत्ययाप्रत्ययसाधारणे, 'दिव औत्'(7-1-84) इत्यादौ सञ्चारितत्वात्।

वर्णग्रहणे चानयोरप्रवृत्तिरिति स्पष्टम् 'औ' आपः' (7-1-18) इत्यत्र भाष्ये।

येनानुबन्धेन सानुबन्धकत्वं द्वयनुबन्धकत्वादि वा तदनुच्चारणे एवैषा धर्मिग्राहकमानात्। तेन 'जश्शसोः' (7-1-20) इत्यत्र नैषेति निरनुबन्धकत्वात् सद्धितशस एवात्र ग्रहणं स्यादिति न शङ्कयम्।

एवमन्त्यान्यतरानुबन्धोच्चारण एव तेन 'वनो र च' (4-1-7) इत्यादौ ङ्वनिप्क्वनिपोर्ग्रहणसिद्धिः।

एकानुबन्धग्रहणे सम्भवतीति त्वर्थो न भाष्यादिसम्मत इत्यन्यत्र विस्तरः॥82-83॥

ननु 'कुटीर' इत्यादौ स्वार्थिकत्वात्। स्वार्थिकानां प्रकृतितो लिङ्गवचनानुवृत्तेर्न्यायप्राप्तत्वात्। पुंस्त्वानुपपत्तिः, 'अप्कल्पमि'त्यत्र नपुंसककैवचन योरनुपपत्तिश्चेत्यत आह-

क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते॥84॥

'णचः स्त्रियाम्' (5-4-14) इति सूत्रे स्त्रियामित्युक्तिरस्या ज्ञापिका। अन्यथा 'कर्मव्यतिहारे णच स्त्रियाम्' (3-3-43) इति स्त्रियामेव विधानात्। किं तेन? स्पष्टा चेयं बहुज्विधायके भाष्ये॥84॥

ननु 'सुपथी नगरी'ति 'युवोरनाकौ' (7-1-1) इति सूत्राभाष्योदाहृत 'इनः स्त्रियाम्' (5-4-152) इति कप् स्यादत आह-

समासान्तविधिरनित्यः॥85॥

'प्रतेरंश्वादयस्तत्पुरुषे' (6-2-193) इत्यन्तोदात्तत्वायांश्वादिषु राजन्शब्दपाठोऽस्या ज्ञापकः, अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन।

'द्वित्रिभ्यां पाद्दन्मूर्द्धसु' (6-2-197) इति स्वरविधायके भाष्ये स्पष्टेयम्॥85॥

ननु 'शतानी'त्यादौ नुमि कृते षट्संज्ञा प्राप्नोति, ततश्च लुक् स्यात्तथा-'उपादास्ते'त्यत्रात्त्वे कृते 'स्थाध्वोरिच्च' (1-2-17) इतीत्त्वं प्राप्नोतीत्यत आह-

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य॥86॥

सन्निपातः -द्वयोः सम्बन्धस्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्याऽनिमित्तम्। उपजीव्यविरोधस्यायुक्तत्वमिति।

अत एवात्र सन्निपादशब्देन न पूर्वपरयोः सम्बन्ध एव, किन्तु विशेष्य विशेषणसन्निपातोऽपि गृह्यते। अत एव 'ग्रामणिकुलमि'त्यादौ नपुंसकह्रस्वत्वेऽपि 'पिति

कृति' (6-1-71) इति तुग्न प्रातिपदिकाजन्तत्वसन्निपातेन जातस्य ह्रस्वस्य तदविघातकत्वात।तुक्यजन्तत्वविघातः स्पष्ट एव।

न चार्थाश्रयत्वेन ह्रस्वस्य बहिरङ्गतयाऽसिद्धत्वम,। अर्थकृतबहिरङ्गत्वानाश्रयणस्योक्तत्वात। किञ्च 'षत्वतुकोरसिद्धः' (6-1-86) इत्वेतद्बलात्कृतितुग्ग्रहणाच्च तुग्विधौ बहिरङ्गपरिभाषाया अप्रवृत्वैः।

सर्वविधसन्निपातग्रहणादेव वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादित्येतत्परिभाषादोषनिरूप-णावसरे वार्तिककृतोक्तम। नहि प्रत्ययः पूर्वपरसन्निपातनिमित्तकः स एव च सन्निपातशब्देन गृह्यत इति मत्वा न प्रत्ययः सन्निपातनिमित्तक इति शङ्कयां तदभ्युपेत्यैवाङ्गसंज्ञा तर्ह्यनिमित्तं स्यादित्येकदेशिनोक्तमिति न तद्भाष्यविरोधः। किञ्चैवं 'शैवो गार्ग्यो वैनतेय' इत्यादावप्यङ्गसंज्ञाया लोपनिमित्तत्वानापत्त्या वर्णाश्रय इत्यस्य वैयर्थ्यम।

'ग्रामणिकुलं, ग्रामणिपुत्र' इत्यादावुत्तरपदनिमित्तके ह्रस्वत्वे यथाकथञ्चिद्बहिरङ्गपरिभाषयाऽपि वारणं सम्भवतीति 'कृन्मेजतः' (1-1-39) इत्यत्र 'ह्रस्वस्य पिति' (6-1-71) इति सूत्रे चैकदेशिना तया परिभाषया तुग्वारितो भाष्ये। अत एव परिभाषाफलत्वेनेदमुक्तं 'कृन्मेजन्तः' इति सूत्रे वार्तिककृतेति केचित।

सन्निपातलक्षणविधित्वमस्या लिङ्गम। स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यः सन्निपातस्तद्विघातस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति।

नन्वेवं 'रामाये'त्यादौ 'सुपि च' (7-3-102) इति दीर्घानापत्तिः। अदन्ताङ्गेसन्निपातेन जातस्य यादेशस्य तदविघातकत्वात। न च यञादित्वसापेक्षदीर्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविघात इति वाच्यम। आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जायमानत्वेनैतत्प्रवृत्तेः। किञ्चान्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वेऽपि तत्र कृते तस्यासिद्धत्वे मानाभावः। किञ्च, आतिदेशिकसन्निपातविघाता-भावमादायैतत्प्रवृत्तौ 'गौरी'त्यादौ सम्बुद्धिलोपेऽपि स्थानिवत्तवेन ह्रस्वनिमित्तसन्निपातविघाता-भावात्तत्रैतस्यातिव्याप्तिपर- 'कृन्मेजन्तः' (1-1-39) इति सूत्रस्थभाष्या सङ्गतिः। सन्निपातस्य अशास्त्रीयत्वान्नात्र स्थानिवत्त्वमिति चेत,।तर्ह्यत्रासिद्धत्वमपि कथमिति विभावय, अशास्त्रीयेऽसिद्धत्वाप्रवृत्तेः 'ईदूदेत'। (1-1-11) इति सूत्रे कैयटेन स्पष्टमुक्तत्वात। एवं च पूर्वत्रासिद्धीयेऽपि कार्य एतत्परिभाषाप्रवृत्तिर्भवत्येवेति चेत,। न। 'कष्टाय' (3-1-14) इति निर्देशेनैतस्या अनित्यत्वात।

ययोः सन्निपातस्य विघातकं शास्त्रं तयोः सन्निपातनिमित्तकविधावुपादानमपेक्षितमिति तु नाऽऽग्रहः। अत एव

‘दाक्षिरि’त्यात्राकारान्तप्रकृतीन । सन्निपातनिमित्ताङ्गसंज्ञाऽनया परिभाषयाऽल्लोपस्य निमित्तं न स्यादित्याशङ्क्यानित्यवेन समाहितं ‘कृन्मेजन्तः’ (1-1-39) इति सूत्रे भाष्ये। ‘न ह्यङ्गसंज्ञायाम-दन्तस्याङ्गसंज्ञे’त्युक्तमस्ति।

न च ‘कुम्भकारेभ्य आधय’ इत्यादावव्ययसंज्ञाया अनया परिभाषया वारणपरभाष्यासङ्गतिः। अनया परिभाषया लुग मा भूत, अव्ययत्वं तु स्यादेव, लुका हि तदीयसन्निपातस्य विघातो नाव्ययसंज्ञया, संज्ञाफलं त्वकच । स्यादिति वाच्यम । एतदुदाहरणपरभाष्यप्रामाण्येन साक्षात परम्परया वा स्वनिमित्तसन्निपात-विधातकस्य स्वयंनिमित्तमित्यर्थेनादोषात । एतेनात्राकच न्यादित्यपास्तम ।

न च कार्यकालपक्षे लुगेकवाक्यतापन्नसंज्ञाबाधेऽप्यकजेकवाक्यतापन्ना स्यादिति वाच्यम, अन्तरङ्गायां तदेकवाक्यतापन्नसंज्ञायां बहिरङ्गगुणादेरसिद्धत्वात । लुगेकवाक्यतापन्ना तु न, गुणादितोऽन्तरङ्गोभयोरपि शब्दतः सुबाश्रयत्वात ।

‘न यासयोः’ (7-3-45) इति निर्देशाच्चैषाऽनित्या, तेन नातिप्रसङ्गः। स्पष्टा चेयं ‘कृन्मेजन्तः’ (1-1-39) इति सूत्रे भाष्ये। अस्या अनित्यत्वे फलानि भाष्ये परिगणितानि। वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम्दाक्षिः। आत्वं पुग्विधेः - ‘क्रापयति’। पुग । ह्रस्वस्य- ‘अदीदपत’ । त्यदाधकारष्टाब्विधेः ‘यासे’ति। इड्विधिराकारलोपस्य ‘पपिवान’ । ‘ह्रस्वनुड्भ्यां मतुप । ‘अन्तोदात्तादुत्तरपदात’ । (6-1-169) इतिमतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य - ‘अग्निमान, परमवाचा’ । नदीह्रस्वत्वं सम्बुद्धिलोपस्य- ‘नदि, कुमारी’त्यादि। यादेशो दीर्घत्वस्य- ‘कष्टाय’।

इतोऽन्यत्र प्रवृत्तिरेव, ‘दोषाः खल्वपि साकल्येन परिगणिता’ इति भाष्योक्तेरित्यन्यत्र विस्तरः॥86॥

ननु ‘पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र’ इत्यादौ ‘द्विगोर्लुक’ (4-1-88) इत्यणो लुकि ‘लुक्तद्धित’ (1-2-49) इति स्त्रीप्रत्ययलुक्यानुकः श्रवणापत्तिरत आह-

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः॥87॥

अत्र च ‘बिल्वकादिभ्यश्छस्य लुक’ (6-4-153) इति सूत्रस्थं छग्रहणं ज्ञापकम । तद्धि छमात्रस्य लुग्बोधनद्वारा कुकोऽनिवृत्तिर्यथा स्यादित्यर्थम । कृतकुगागमा नडाद्यन्तर्गतबिल्वादय एव तत्र निर्दिष्टा बिल्वकादिशब्देन। न चैवमपि छग्रहणं व्यर्थम, कृतकुगागमानुवादसामर्थ्यादेव तदनिवृत्तिसिद्धेः। अन्यथा ‘बिल्वादिभ्य’ इत्येव वदेत, ‘लक्षणप्रतिपदोक्त’परिभाषया बिल्वादिपुरस्कारेण विहितप्रत्ययस्यैव लुग्विधानान्नातिप्रसङ्ग इति वाच्यम, ततोऽपि प्रतिपदोक्तत्वेन ‘बिल्वादिभ्योऽण’ (4-3-136) इति विकाराद्यर्थस्य लुगापत्तिवारणार्थं कुगनुवादचारितार्थ्यात । समुच्चयार्थकचशब्दयोगे तु विधेययोरेककालि-कत्वैकदेशत्वनियमान्न्यायसिद्धापीयम ।

यत्तु 'णाविष्ठवदि'त्यनेन पुंवत्त्वविधानमेतदनित्यत्वज्ञापनार्थम,□ अन्यथा 'एतयती'त्यादौ टिलोपेनैव □ीपि निवृत्ते सन्नियोगशिष्टपरिभाषया नस्यापि निवृत्त्या 'एतयती'त्यादिसिद्धौ पुंवत्त्ववैयर्थ्यं स्पष्टमेवेति 'टे' (6-4-155) इति सूत्रे कैयटः तन्न, 'इडबिडमाचष्ट ऐडबिडयती'त्यादौ पुंवत्त्वस्य आवश्यकत्वात□'ऐनेयः, श्यैनेय' इत्यादि तु स्थानिवत्त्वेन सिद्धमित्यन्यत्र विस्तरः॥87॥

ननु 'चुरा शीलमस्याः सा चौरी'त्यादौ 'शीलम'□(4-4-61) 'छत्रादिभ्यो णः' (4-4-62) इति णे □ीप ङ्ग प्राप्नोतीत्यत आह-

ताच्छीलिके णेऽण्कृतानि भवन्ति॥88॥

'अन'□(6-4-167) इत्यणि विहितप्रकृतिभावबाधनार्थं 'कार्मस्ताच्छील्ये' (6-4-172) इति निपातनमस्या ज्ञापकम□

ताच्छीलिकणान्ताद् 'अणो द्व्यचः' (4-1-156) इति फिञ्सिद्धि रप्यस्याः प्रयोजनमिति नव्याः।

ताच्छीलिक इत्युक्ते 'तदस्यां प्रहरणम'□(4-1-57) इति णे 'दाण्डे'त्येव। 'कार्मः' (6-4-172) इति सूत्रे भाष्ये स्पष्टा॥88॥

ननु 'कंसपरिमृड्भ्यामि'त्यादौ 'मृजेर्वृद्धिः' (7-2-114) दुर्वारेत्यत आह-

धातोः कार्यमुच्यमानं तत्प्रत्यये भवति॥89॥

'भ्रौणहत्ये' तत्त्वनिपातनमस्या ज्ञापकम□ 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमि'ति पाठस्तु 'प्रसृड्भरि'त्यादौ 'अनुदात्तस्य चर्दुपधस्य' (6-1-59) इत्यमापादनेन भाष्ये दूषितः।

यत्कार्यं प्रत्ययनिमित्तं तत्रेयं व्यवस्थापिका। तेन पदान्तत्वनिबन्धनं 'नशेर्वा' (8-2-63) इति कुत्वं 'प्रणड्भ्यामि'त्यादौ भवत्येव। इय□ादिविधौ तु नैषा। 'न भूसुधियोः' (6-4-85) इति निषेधेनानित्यत्वात□'मृजेर्वृद्धिः' (7-2-114) इत्यत्र भाष्ये स्पष्टा॥89॥

ननु 'सर्वके, उच्चकैरि'त्यादौ सर्वनामाव्ययसंज्ञे न स्यातामत आह-

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते॥90॥

'नेदमदसोरकोः' (7-1-11) इति सूत्रे 'अकोरि'ति निषेधोऽस्या ज्ञापकः। 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति 'येन विधिः' (1-1-72) इति सूत्रे भाष्ये पाठः॥90॥

ननु 'गातिस्थाघुपाभूभ्यः' (2-4-77) इति सिचो लुक□'अपासीदि'त्यादौ पातेरपि स्यादत आह-

लुग्विकरणालुग्विकरणर्योलुग्विकरणस्य॥91॥

अस्याश्च ज्ञापकः 'स्वरतिसूति' (7-2-44) इति सूत्रे सुति इति वक्तव्ये सूतिसूयत्योः पृथङ्निर्देश इति कैयटः। तन्न, साहचर्यादलुग्विकरणस्यैव ग्रहणे प्राप्ते पृथङ्निर्देशस्य तज्ज्ञापकत्वासम्भवात।

ध्वनिता चेयं परिभाषा 'यस्य विभाषा' (7-2-15) इत्यत्र भाष्ये। तत्र हि विदित इति प्रयोगे निषेधमाशङ्क्य ''यदुपाधेर्विभाषा तदुपार्धेर्निषेधो 'विभाषा गमहनविदविशाम'(7-2-68) इति सूत्रे शविकरणस्य ग्रहणं लुग्विकरणश्चायमि''त्युक्तम।तत्र चो हेतौ। यतोऽयं लुग्विकरणोऽतो विशिसाहचर्याच्छविकरणस्य ग्रहणं न तु हनिसाहचर्यादस्याप्येतत्परिभाषा विरोधादिति तदाशयः।

अत एव परिभाषायां लुग्विकरणस्यैवेति नोक्तम। कण्ठस्तु भाष्ये एषा क्वापि न पठिता। 'गातिस्था' (2-4-77) इति सूत्रे पिबतेर्ग्रहणं कर्त्तव्यमिति वार्तिककृता सर्वत्रैव पाग्रहणेऽलुग्विकरणस्य ग्रहणमिति भाष्यकृता चोक्तम।'स्वरतिसूति' (7-2-44) इति सूत्रे कैयटेन च स्पष्टमुक्ता॥

ननु 'प्रजिघाययिषती'त्यादौ 'हेरचि' (7-3-56) इति विधीयमानं कुत्वं न स्यादत आह-

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम॥92॥

'अचि'ति प्रतिषेध एवास्या ज्ञापकः। इयं च कुत्वविषयैव। 'हेरचि' इति सत्रे भाष्ये स्पष्टेयम॥92॥

ननु 'युष्मभ्यमि'त्यादौ 'भ्यसः' (7-1-30) इत्यत्र भ्यमिति च्छेदे भ्यसो भ्यमि कृतेऽन्त्यलोप एत्वं स्यादत आह-

अङ्गवृत्ते पुनर्वृत्ताववविधिः॥93॥

अङ्गे-अङ्गाधिकारे, वृत्तं- निष्पनं यत्कार्यं तस्मिन सति पुनरन्यस्याङ्गकार्यस्य वृत्तौप्रवृत्ताववविधानं भवतीत्यर्थः।

एषा च 'ज्यादादीयसः (6-4-160) इत्याद्विधानेन ज्ञापिता। अन्यथेकारलोपेन 'अकृत्सार्व0'(7-4-25) इति दीर्घेण च सिद्धे तद्वैयर्थ्यं स्पष्यमेव। अत एव भिन्नस्थानिकाङ्गकार्यविषयाप्येषा।

इयं चानित्या, 'द्वयोः' (1-2-59, 5-3-92) इति निर्देशात। अनित्यत्वबललभ्यार्थमादायैव 'भ्यसो भ्यम'(7-1-30) इति सूत्रे भाष्ये निष्ठितस्येति पठितम।

केचित्तु अनया परिभाषया न किञ्चिल्लक्ष्यं साध्यते। अत एव 'ज्ञाजनोर्जा' (7-3-79) 'ज्यादादीयसः' (6-4-160) इति सूत्रयोरेनां ज्ञापयित्वा किं प्रयोजनम।इति प्रश्ने पिबतेर्गुणप्रतिषेध उक्तः, स न व्यक्तव्य इत्येव प्रयोजनमुक्तं न तु लक्ष्यसिद्धिरूपम।

RSKS Bhopal Campus

तदुक्तम्-'भ्यसोऽभ्यम्'(7-1-30) इत्यत्रभ्यमिति च्छेदः शेषे लोपश्चान्त्यलोप एव 'अतो गुणे' (6-1-97) इति पररूपेण सिद्धं 'युष्यभ्यमि'त्यत्यन्यत्र निरूपितम्। एवञ्च सूत्रद्वयस्थमेतज्ज्ञापनपरं भाष्यं 'भ्यसोऽभ्यम्' इति सूत्रस्थं च भाष्यमेकदेश्युक्तिरित्याहुः॥93॥

यत्तु 'ओरोदि'ति वाच्ये 'ओर्गुणः' (6-4-116) इति गुणग्रहणात्-

संज्ञापूर्वकविधेरनित्यत्वम्॥94॥

इयं च विधेयकोटौ संज्ञापूर्वकत्व एव। तेन स्वायम्भुवमित्यादि सिद्धम्।

तथा 'निलोडि'त्येव सिद्धे आनिग्रहणात्-

आगमशास्त्रमनित्यम्॥95॥

तेन 'सागरं तर्तुकामस्य' इत्यादि सिद्धम्।

तथा तनादिपाठादेव सिद्धे 'तनादिकृञ्भ्यः' (3-1-79) इति सूत्रे कृञ्ग्रहणाद्-

गणकार्यमनित्यम्॥96॥

तेन 'न विश्वसेदविश्वस्तम्'इत्यादि सिद्धम्।

तथा चक्षिो ि◌त्करणात्-

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्॥97॥

तेन 'स्फायन्निर्मोक' इत्यादि सिद्धम्।

तथा विनार्थनञा समासेनानुदात्तं पदमनेकमित्येव सिद्धे वर्जग्रहणात्-

नञ्घटितमनित्यम्॥98॥

तेन 'नेय◌ुवङ्' (1-4-4) इत्यस्यानित्यत्वाद् 'हे सुभ्रु' इति सिद्धमिति।

तन्न, भाष्येऽदर्शनात्। भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात्। भाष्याविचारितप्रयोजनानां सौत्राक्षराणां पारायणादावदृष्ट-मात्रार्थकत्वकल्पनाया एवौचित्यात्।

किञ्च ज्ञापितेऽप्यानीत्यस्य न सार्थक्यमाडागमशून्यप्रयोगस्य अप्रसिद्धेः। आट्ग्रहणं तु लोड्ग्रहणवदिति बोध्यम्।अत एव 'घोर्लोपो लेटि वा' (7-3-70) इति सूत्रे वेति प्रत्याख्यातम्।लोपेऽप्याट्पक्षे आटः श्रवणं भविष्यति 'दधादि'ति अटि 'दधदि'ति आगमशास्त्रस्यानित्यत्वे त्वाट्यसति 'दधादि'त्यासिद्ध्या वाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिः स्पष्टैव।

एतेन यत्कैयटेन केचिदित्यादिनाऽस्यैव वाग्रहणस्य तदनित्यत्वज्ञापकतोक्ता सापि चिन्त्या, प्रत्याख्यानपरभाष्यविरोधात्,'तनादि' सूत्रे कृञग्रहणस्य भाष्ये प्रत्याख्नाच्च, चक्षिो ◌ाकारस्यान्तेदित्वा-भावसम्पादनेन चारितार्थ्याच्च॥94-98॥

एवमेव आतिदेशिकमनित्यम्॥99॥

सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान॥100॥

इत्यादि भाष्यानुक्तं बोध्यम।

'स्वायम्भुवमि'त्यादि लोकेऽसाध्वेवेत्यन्यत्र विस्तरः॥99-100॥

यदपि ननु हन्तेर्यङ्लुक्यार्शीलिि। वधादेशो न स्यादत आह-

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम॥101॥

षाष्ठद्वित्वस्य द्विःप्रयोगत्वसिद्धान्तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनेनेदं न्यायसिद्धम। अत एव 'जुहुधी'त्यादौ द्वित्वे कृते धित्वसिद्धिरिति, तदपि न, भाष्येऽदर्शनात।

किञ्च तेन सिद्धान्तेन प्रत्येकं द्वयोस्तत्त्वबोधनेऽपि समुदायस्य तत्त्वबोधने मानाभावः। अत एव 'दयतेर्दिगि' (7-4-9) इति सूत्रेऽस्तेः परत्वाद् द्वित्वे कृते परस्यास्तेर्भूभावे पूर्वस्य श्रवणं प्राप्नोतीत्याशङ्क्य विषयसप्तम्याश्रयणेन परिहृतं भाष्ये। अन्यथा त्वदुक्तरीत्यैकाज्द्विर्वचनन्यायेन समुदायस्यैवादेशापत्तौ तदसङ्गतिः स्पष्टैव। तस्मादुत्तरखण्डमादायैव यथायोगं तत्तत्कार्यप्रवृत्तिर्बोध्या।

'भूसुवोः' (7-3-88) इत्यस्य तदन्ताङ्गस्येत्यर्थात। प्राप्तस्य गुणनिषेधस्य बोभूत्विति नियम इति न तद्विरोधः। तस्माद्धन्तेर्यङ्लुकि 'वध्यादि'त्यादि माधवाद्युदाहृतं चिन्त्यमेवेत्यन्यत्र विस्तरः॥101॥

यदपि- ननु 'वृद्धिर्यस्याचामादिः' (1-1-73) इत्यत्रेक्परिभाषोपस्थितौ शालीयाद्यसिद्धिरत आह-

विधौ परिभाषोपतिष्ठते नानुवादे॥102॥

अनुद्यमानविशेषणेषु तन्नियामिका परिभाषा नोपतिष्ठत इति तदर्थः। विध्यङ्गभूतानां परिभाषाणां विधेयेनासिद्धतया सम्बन्धासम्भवेऽपि तद्विशेषणव्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयम।किञ्च 'उदीचामातः स्थाने' (7-3-46) इति सूत्रे स्थानेग्रहणमस्या लिङ्गम। अन्यथा 'षष्ठी स्थाने' (1-1-49) इति परिभाषयैव तल्लाभे तद्वैयर्थ्यं स्पष्टमेवेति।

तन्न, 'उदात्तस्वरितयोर्यणः' (8-2-4) इत्यादौ 'ष्यङः सम्प्रसारणम'(6-1-13) इति सूत्रभाष्योक्तरीत्या 'अल्लोपोऽनः' (6-4-134) इत्यादौ चैतस्या व्यभिचरितत्वात, भाष्यानुक्तत्वाच्च। स्थानसम्बन्धो न परिभाषालभ्य इत्यर्थस्य 'षष्ठी स्थाने' (1-1-49) इति सूत्रे भाष्ये स्पष्टमुक्तत्वेन त्वदुक्तज्ञापकासम्भवाच्च। तत्र स्थाने- ग्रहणन्तु स्पष्टार्थमेव। किञ्च विधौ परिभाषेति प्रवादः 'इको गुणवृद्धी' (1-1-3) 'अचश्च' (1-2-28) इत्यनयोर्विधीयत इत्यध्याहारमूलकः। अन्यत्र तु नास्याः फलमित्यन्यत्र विस्तरः॥102॥

R.S.K.S. Bhopal Campus

ननु 'नमस्करोति देवान,नमस्यति देवानि'त्यादौ 'नमःस्वस्ति' (2-3-16) इति चतुर्थी दुर्वारेत्यत आह-

उपपदविभक्तेः कारकविभक्तिर्बलीयसी॥103॥

कारकविभक्तत्वञ्च क्रियाजनकार्थकविभक्तित्वम,तच्च प्रथमाया अप्यस्तीति सापि कारकविभक्तिरिति 'सहयुक्ते'(2-3-19) इत्यादिसूत्रेषु भाष्ये ध्वनितम।

इयं च वाचनिक्येव। अत एव 'यस्य च भावेन' (2-3-37) इति सप्तम्यपेक्षयाधिकरणसप्तम्या बलवत्त्वमनेन न्यायेन 'तत्र च दीयते' (5-1-96) इति सूत्रे भाष्ये ध्वनितं कैयटेन च स्पष्टमुक्तम। एतेन क्रियान्वयित्वं कारकात्वमित्यपास्तम। 'यस्य च भावेन' इति सप्तम्या अपि क्रियान्वयित्वात।

ये तु प्रधानीभूतक्रियासम्बन्धनिमित्तकार्यत्वेन कारकविभक्तीनां बलत्वत्त्वं वदन्ति तेषामुभयोरपि क्रियासम्बन्धनिमित्तकत्वेन तदसङ्गतिः स्पष्टैव, 'नमो वरिवः' (3-1-19) इति सूत्रे नमस्यति देवानित्यादौ चतुर्थीवारणाय भाष्ये उपन्यासस्यासङ्गतेश्च।

एतेन क्रियाकारकसम्बन्धोऽन्तरङ्ग इति तन्निमित्ता विभक्तिरन्तरङ्गा, उपपदार्थेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेत्यपास्तम। नमस्यतीत्यत्र नमःपदार्थऽपि क्रियाकारकभावेनैवान्वयात। अत्र च नमःपदार्थस्यापि क्रियात्वं मुण्डयतौ मुण्डस्येव।

'सह युक्ते' (2-3-19) इत्यादौ च प्रधाने प्रथमासाधनार्थमियं भाष्य उपन्यस्तेत्यन्यत्र विस्तरः॥103॥

नन्वदमुय ि त्यादौ पूर्वस्यापि मुत्वापत्तिरत आह-

अनन्त्यविकारेऽन्त्यसदेशस्य॥104॥

अन्त्यसदेशानन्त्यसदेशयोरेकप्रयोगे युगपत प्राप्तावन्त्यसदेशस्यैवेति तदर्थः। अन्यथा धात्वादेर्नत्वसत्वे 'नेता सोते'त्यादावेव स्याताम,न तु नमति सिञ्चतीत्यादौ।

अनन्त्यविकार इति च लिङ्गम।अन्त्येन समानो देशो यस्य सोऽन्त्यसदेशः। तत्त्वं च अन्त्यवर्णतद्वर्णयोरितराव्यवधानेन बोध्यम।अत एव विद्ध इत्याद्यर्थं 'न सम्प्रसारणे' (6-4-37) इति चरितार्थम।

'अल्लोपोऽनः' (6-1-134) इत्यादेः 'अनस्तक्ष्णे'त्यादावाद्याकारा-दावप्रवृत्तिरप्यस्याः फलम, यजादिस्वादिपरानन्ताङ्गस्याकारस्य लोप इत्यर्थस्यैवअङ्गांशे प्रत्ययस्य उत्थिताकाङ्क्षतयौचित्यादङ्गावयव-यजादिस्वादिरपरस्यान इत्यादि क्रमेणानेकत्रानेकक्लिष्टकल्पनापेक्षयाऽस्या उचितत्वात।

न चैषा 'ष्यः सम्प्रसारणम'(6-1-13) इति सूत्रे भाष्ये प्रत्याख्यातेति भ्रमितव्यम, वार्तिकोक्तफलानामनेकक्लिष्टकल्पनाभिरन्यथासिद्धिं प्रदर्श्यापि यान्येतस्याः

परिभाषायाः प्रयोजनानि तदर्थमेषा कर्त्तव्या प्रतिविधेयं दोषेषु, प्रतिविधानं चोदात्तनिर्देशात्सिद्धमित्युपसंहारात। मिमार्जिषतीत्यर्थं चैषा। तत्र वृद्धेः पूर्वमन्तरङ्गत्वाद् द्वित्वे परत्वादभ्यासकार्ये ततोऽभ्यासेकारस्य वृद्धिवारणायावश्यकी। न च वृद्धौ पुनरभ्यासह्रस्वत्वेन सिद्धिः 'लक्ष्ये लक्षणस्य' इति न्यायेन पुनरप्रवृत्तेः।

यत्तु 'न सम्प्रसारणे' इति सूत्रे भाष्ये नैतस्याः परिभाषायाः प्रयोजनानीत्युक्तं तस्यायमर्थः - एतत्सूत्रप्रयोजनान्येतस्याः परिभाषायाः न भवन्ति, व्यधादावन्त्यसमानदेशयणोऽभावादिति। नैतान्येतस्याः प्रयोजनानीति पाठोऽपि क्वचिद् दृश्यते।

वाचनिक्येवैषा। स्पष्टा च 'ष्यः' (6-1-13) इति सूत्रे 'अदसोऽसेः'(8-2-80) इति सूत्रे च 'केचिदन्त्यसदेशस्ये'त्येनन भाष्य इत्यन्यत्र विस्तरः॥104॥

ननुः 'अव्यक्तानुकरणस्यातः' (6-1-98) इति पररूपं 'पटत इति पटिती'त्यादौ 'अलोऽन्त्यस्य' (1-1-52) इत्यन्त्यस्य प्राप्नोतीत्यत आह-

नानर्थकेऽलोऽन्त्यिधरनभ्यासविकारे॥105॥

अनभ्यासेत्युक्ते 'र्बिभर्ती'त्यादौ 'भृञामित' (7-4-76) इत्याद्यन्त्यस्यैवाभ्यासोऽनर्थकोर्थावृत्त्यभावात्, किन्तु उत्तरखण्ड एवार्थवानिति अन्यत्र निरूपितम।

एषा 'अलोऽन्त्यात' सूत्रे भाष्ये स्पष्टा। फलानामन्यथासिद्धिकरणेन प्रत्याख्याता चेति तत एवावधार्यताम॥105॥

ननु 'ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चे'त्यादौ 'पुमान स्त्रिया' (1-2-67) इत्येकशेषापत्तिः स्त्रीत्वपुंस्त्वातिरिक्तकृतविशेषाभावादत आह-

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः॥106॥

तेन प्रधानस्त्रीत्वपुंस्वातिरिक्ताऽप्रधानस्त्रीत्वपुंस्त्वकृतविशेषस्यापि सत्त्वेन न दोषः।

स्पष्टा चेयं 'पुमान स्त्रिया' (1-2-67) 'नपुंसकमनपुंसकेन' (1-2-69) इत्यनयोर्भाष्ये। अन्तरङ्गोपजीव्यादपि प्रधानं प्रबलमिति 'हेतुमति च' (3-1-26) इत्यत्र भाष्यकैयटयोः॥106॥

ननु स्वस्त्रादित्वप्रयुक्तो मातृशब्दस्य ीब्निषेधः परिच्छेतृवाचकमातृशब्देऽपि स्यादत आह-

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी॥107॥

तेन शुद्धरूढस्य जननीवाचकस्यैव ग्रहणं न परिच्छेत्तृवाचकस्य। योगजबोधे तदनालिङ्गतशुद्धरूढिजोपस्थितिः प्रतिबन्धिकेति व्युत्पत्तिरेव तद्बीजम। रथकाराधिकरणन्यायसिद्धोऽयमर्थः।

कश्चित्तु 'दीधीवेवीटाम्'(1-1-6) इत्यत्रानया परिभाषया दीधीङ्वेवीोरेव ग्रहणं न दीङ्धीङ्वेञ्वीनामिति। तन्न, तथा सति दीवेधीवीटामित्येय वदेदित्यन्ये॥107॥

ननु वातायनार्थे गवाक्षेऽवो वैकल्पिकत्वाद् 'गोक्ष' इत्याद्यपि स्यादत आह-

व्यवस्थितविभाषयाऽपि कार्याणि क्रियन्ते॥108॥

लक्ष्यानुसाराद् व्यवस्था बोध्या। 'शाच्छोः' (7-4-41) इति सूत्रे 'लटः शतृ' (3-2-124) इत्यादिसूत्रेषु च भाष्ये स्पष्टा॥108॥

विधिनियमसम्भवे विधिरेव ज्यायान्॥109॥

नियमे ह्यश्रुताया अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति लाघवाद्विधिरेवेति बोध्यम्। 'यस्य हलः' (6-4-49) इत्यत्र 'इजादेः सनुमः' (8-4-32) इत्यादौ च भाष्ये स्पष्टेयम्॥109॥

ननु 'आशंसायां भूतवच्च' (3-3-132) इत्यनेन लु इव ल्लिटोरप्यतिदेशः स्यादत आह-

सामान्यातिदेशे विशेषानतिदेशः॥110॥

सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावोऽस्या बीजम्। तेनानद्यतनभूतरूपे विशेषे विहितयोर्नातिदेशः। इयमनित्या, 'न ल्यपि' (6-4-69) इति लिङ्गात्। तेन स्थानिवत्सूत्रेण विशेषातिदेशोऽपि। स्पष्टं चैतत्सर्वं स्थानिवत्सूत्रे भाष्ये॥110॥

ननु 'तित्स्वरितम्'(6-1-185) इति स्वरितत्वं 'चिकर्षती'त्यादौ स्यादत आह-

प्रत्ययाप्रत्ययोः प्रत्ययस्य ग्रहणम्॥111॥

इयं च 'अङ्गस्य' (6-4-1) इति सूत्रे भाष्ये पठिता। वर्णग्रहणे च न प्रवर्त्तत इति तत्रैव कैयटे स्पष्टम्।अत एव 'सनाशंसभिक्ष उः' (3-2-168) 'वले' (6-3-118) इत्यत्र सन्वलयोः प्रत्यययोर्ग्रहणम्।

परे तु 'तित्स्वरितम्'(6-1-185) इति सूत्र एषा परिभाषा लक्ष्यसंस्काराय भाष्ये क्वापि नाश्रितेति कैयटेनोक्तम्।'अङ्गस्य' (6-4-1) इति सूत्रे तत्प्रत्याख्यानायैषा भाष्य एकदेशिनोक्ता। अत एव 'तिति प्रत्ययग्रहणं कर्तव्यमि'ति वार्तिककृतोक्तम्। उक्तसूत्रयोर्व्याख्यानात्प्रत्यययोरेव ग्रहणमित्याहुः॥111॥

ननु 'विपराभ्यां जेः' (1-3-19) इत्यात्मनेपदम्परा सेना जयतीत्यर्थके 'पराजयति सेने'त्यत्र प्राप्नोतीत्यत आह-

सहचारितासहचरितयोः सहचरितस्यैव ग्रहणम्॥112॥

तेन विशब्दसाहचर्यादुपसर्गस्यैव पराशब्दस्य ग्रहणमिति तत्रैव भाष्ये स्पष्टम्।

R.S.K. Bhopal Campus

सहचरणं सदृशयोरेवेति सहचरितशब्देन सादृश्यवानुच्यते। 'रामलक्ष्मणावि'त्यादावपि सादृश्यमेव नियामकम। सदृयोरेव सहविवक्षा तयोरेव सहप्रयोग इत्युत्सर्गाच्च।

ध्वनितं चेदं 'कर्मप्रवचनीययुक्ते द्वितीया' (2-3-8) इति सूत्रे भाष्ये। तत्र हि- 'पञ्चम्यपाङ्परिभिः' (2-3-10) इति सूत्रेण लक्षणादिद्योदकपरियोगे पञ्चमीमाशङ्क्य ''यद्यप्ययं परिर्दृष्टापचारो वर्जने चावर्जने च, अयं खल्वपशब्दोऽदृष्टापचारो वर्जनार्थ एव कर्मप्रवचीयस्तस्य कोऽन्यः सहायो भवितुमर्हत्यन्यो वर्जनार्थाद्यथाऽस्य गोः सहायेनार्थ इति गौरेवानीयते नाश्वो न गर्दभ'' इत्युक्तम। तेन हि - सदृशानामेव प्रयोगे सहायभावो बोधितः।

'द्विस्त्रिश्चतुः' (8-3-43) इति सूत्रे साहचर्येणैव कृत्वोऽर्थस्य ग्रहणे सिद्धे कृत्वोऽर्थग्रहणादेषानित्या। तेन 'दीधीवेवीटाम्' (1-1-6) इत्यत्र धातुसाहचर्येऽप्यागमस्येटो ग्रहणमित्यन्यत्र विस्तरः॥112॥

ननु 'अस्थि' (7-1-75) इत्यनङ् 'प्रियसक्थ्ना ब्राह्मणेने'त्यत्र न स्यात अङ्गस्य नपुंसकत्वाभावादत आह-

श्रुतानुमितयोः श्रुतसम्बन्धो बलवान॥113॥

श्रुतेनैव सम्बन्धो नानुमितेन प्रकरणादिप्राप्तेनेत्यर्थः। प्रकरणादितः श्रुतेर्बलवत्त्वादिति भावः। एवं च तत्र लिङ्गमस्थ्यादीनामेव विशेषणं नाङ्गस्य। शिशीलुङ्नुम्विधिषु तु गृह्यमाणस्याभावात प्रकरणप्राप्ताङ्गस्यैव विशेषणम।

अत एव 'वा नपुंसकस्य' (7-1-79) इति सूत्रे वा शाविति न कृतम। तत्र नपुंसकग्रहणं हि गृह्यमाणस्य शत्रन्तस्यैव नपुंसकत्वे यथा स्यात। 'बहवो ददतो येषु तानि कुलानि बहुददती'त्यत्र मा भूत, 'बहुनि ददन्ति येषु ते बहुददन्त' इत्यत्र यथा स्यादित्येवर्थम। स्पष्टं चेदं 'स्वमोर्नपुंसकात्' (7-1-23) इत्यत्र भाष्ये।

केचित्तु 'अचो रहाभ्यां द्वे' (8-4-46) इत्यत्र श्रुतेन रेफस्य निमित्तत्वेन यरन्तभावादनुमितेन कार्यित्वं बाध्यत इत्येतदुदाहरणमाहुः, तन्न। तक्रकौण्डिन्यन्यायेन सिद्धेरित्यन्त्र विस्तरः॥113॥

ननु 'तत्पुरुषे तुल्यार्थ' (6-2-2) इति स्वरः 'परमेण कारकेण, परमकारकेणे'त्यादौ स्यात्तथा 'गातिस्थाघुपाभूभ्यः' (2-4-77) इति लुक्पै ओवै शोषण इत्यतः कृतात्त्वात्परस्यापि स्यादत आह-

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम॥114॥

लक्षणं लाक्षणिकमुपचारात।

P.S.K. Bhopal Campus

तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तस्तस्यैव ग्रहणं शीघ्रोपस्थितिकत्वात। द्वितीयो हि विलम्बोपस्थितिकः। 'पै' इत्यस्य पा इति रूपं लक्षणानुसन्धानपूर्वकं विलम्बोपस्थितिकम, पिबतेस्तु तच्छीघ्रोपस्थितिकम। इदमेव ह्येतत्परिभाषाबीजम।

इयं च वर्णग्रहणेऽपि 'ओत' सूत्रे भाष्ये सञ्चारितत्वात।

यत्तु वर्णग्रहणे नैषा 'आदेचः' (6-1-45) इत्यत्रोपदेशग्रहणादिति, तत्तु तस्मिन्नेव सूत्रे शब्देन्दुशेखरे दूषितमिति तत एव द्रष्टव्यम।

अनित्या चेयं 'भुवञ्च महाव्याहृतेः' (8-2-71) इति महाव्याहृतिग्रहणादित्यन्यत्र विस्तरः॥114॥

नन्वेनं दे॰ो दोधातोश्च कृतात्त्वस्य घुसंज्ञा न स्यात, तथा मे॰ आत्त्वे 'प्रणिमाते'त्यादौ 'नेर्गदनद' (8-4-17) इति णत्वं न स्यात। तथा 'गै' इत्यस्यात्त्वे 'घुमास्था' (6-4-66) इतीत्वं न स्यादत आह-

गामादाग्रहणेष्वविशेषः॥115॥

अत्र च ज्ञापकं दैपः पित्त्वम। तद्धि 'अदाबि'ति सामान्यग्रहणार्थम। अन्यथा लाक्षणिकत्वादेव विधौ तद्ग्रहणे सिद्धे किं निषेधे सामान्यग्रहणार्थेन पित्वेन। तेन चैकदेशानुमतिद्वारा सम्पूर्णपरिभाषा ज्ञाप्यते।

इयं च 'लक्षणप्रतिपदोक्त'परिभाषा- 'निरनुबन्धक'परिभाषा-'लुग्विकरण' परिभाषाणां बाधिका। 'दाधाघु' (1-1-20) सूत्रे भाष्ये स्पष्टा।

'गातिस्था' (2-4-77) इति सूत्रे इणादेशगाग्रहणमेवेष्यत इति दोष इत्यन्यत्र विस्तरः॥115॥

ननु वृद्ध्यादिसंज्ञाः समुदाये स्युरत आह-

प्रत्येकं वाक्यपरिसमाप्तिः॥116॥

देवदत्तादयो भोज्यन्तामित्यत्र भुजिवत॥116॥

नन्वेवं संयोगसंज्ञासमाससंज्ञाऽप्यस्तसंज्ञा अपि प्रत्येकं स्युरत आह-

क्वचित्समुदायेऽपि॥117॥

'गर्गाः शतं दण्ड्यन्ताम, अर्थिनश्च राजानो हिरण्येन भवन्ती'त्यादौ दण्डनवत। लक्ष्यानुरोधेन च व्यवस्था॥117॥

ननु 'यूस्त्र्याख्यौ' (1-4-3) इत्यत्र व्यक्तिपक्षे दीर्घनिर्देशादनण्त्वेन ग्राहकसूत्राप्राप्त्योदात्ताद्यन्यतमोच्चारणेऽन्यस्वरकस्य संज्ञा न स्यादत आह-

अभेदका गुणाः॥118॥

असति यत्रे स्परूपेणोच्चारितो गुणो न भेदको न विवक्षित इत्यर्थः।

अत्र च 'अस्थिदधि' (7-1-75) इत्यादावन॰ादेरुदात्तस्यैवोच्चारणेन सिद्धे उदात्तग्रहणं ज्ञापकम॰

'स्वरूपेणोच्चारित' इत्युक्तेरनुदात्तादेरन्तोदात्तादित्युदात्तादिशब्दोच्चारणे विवक्षैव। उञः (1-1-17) 'ऊँ' (1-1-18) इत्यत्र अननुनासिके एवोच्चारणीये यत्राधिक्येनानुनासिकोच्चारणाद्विवक्षा बोध्या। 'पथिमथ्यऋभुक्षाम॰ (7-1-85) इत्यादौ स्थान्यनुरूपतयानुनासिक एवोच्चारणीये निरनुनासिकोच्चारणात्तद्विवक्षा। एतदर्थमेव 'असति यत्र' इत्युक्तम॰

न चैवमस्थ्यादीनां 'नब्विषयस्य' इत्याद्युदात्ततया अन्त्यादेशस्यान॰ः स्थान्यनुरूपेऽनुदात्त एवोच्चारणीये उदात्तोच्चारणं विवक्षार्थं भविष्यतीति कथमस्य ज्ञापकत्वमिति वाच्यम॰ परमास्थिशब्दादावन्तोदात्त उदात्तगुणकस्यापि स्थानित्वेन विवक्षायां मानाभावात॰

'चतसर्याद्युदात्तनिपातनं करिष्यते, वधादेश आद्युदात्तनिपातनं करिष्यते पदादयोऽन्तोदात्ता निपात्यन्ते, सहस्य स उदात्तो निपात्यत' इत्यादिभाष्यं त्वेकश्रुत्याष्टाध्यायीपाठे क्वचिदुदात्ताद्युच्चारणं विवक्षार्थमित्याशयेन। त्रैस्वर्येण पाठ इति पक्षे तु ज्ञापकपरं भाष्यमिति कैयटादयः।

परे तु- निपातनं नामान्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणम,॰तत्तद्रूपाद् यत्रात्तत्र तत्रोदात्तादिविवक्षा। 'तिसृचतसृ' इत्यत्र द्वन्द्वप्रयुक्तेऽन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणमन्यत्र स्थान्यनुरूपे स्वर उच्चारणीये तत्तदुच्चारणं विवक्षार्थम॰

सम्पूर्णाष्टाध्याय्याचार्येणैकश्रुत्या पठितेत्यत्र न मानम॰ क्वचित्पदस्यैकश्रुत्यापि पाठो यथा 'दाण्डिनायन' (6-4-174) इत्यादि सूत्र 'ऐक्ष्वाके'ति। यद्यप्यध्येतार एकश्रुत्यैवाङ्गानि पठन्ति ब्राह्मणवत्तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः।

विधेयाण्विषये त्वप्रत्यय इति निषेधान्न गुणाभेदकत्वेन सवर्णग्रहणम॰ अत एव घटवदित्यादौ मतोर्मस्य नानुनासिको वकारः। अत एव 'तद्वानासाम॰ (4-4-125) इति सूत्रनिर्देशः। अन्यथा 'प्रत्यये भाषायाम॰ इति नित्यमनुनासिकः स्यात॰ जातिपक्षे तु नास्योपयोग इति बोध्यम॰ 'यू' इत्यादौ दीर्घमात्रवृत्तिजातिनिर्देशान्न क्षतिरित्यन्यत्र विस्तरः॥118॥

ननु 'सर्वनामानि' (1-1-27)इत्यत्र णत्वाभावनिपातनेऽपि लोके सणत्वप्रयोगस्य साधुत्वं स्यादत आह-

बाधकान्येव निपातनानि॥119॥

तत्तत्कार्ये नाप्राप्ते निपातनारम्भात। 'पुराणप्रोक्तेषु' (4-3-105) इति निपातितपुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तोऽपि पृषोदरादित्वान्नेति बोध्यम।

पुराणेति पृषोदरादिः पुरातनेति चेत्यन्ये।

इयं सर्वादिसूत्रे भाष्ये स्पष्टा। अबाधकान्यपि निपातनानीति तु भाष्यविरुद्धम॥119॥

ननु 'ऊख' धातोर्द्वित्वे स्वत एव ह्रस्वत्वात।पूर्वमभ्याह्रस्वाप्रवृत्तौ हलादिःशेषे सवर्णदीर्घे ह्रस्वापत्तिरत आह-

पर्जन्यवल्लक्षणप्रवृत्तिः॥120॥

एवं च ह्रस्वस्यापि ह्रस्वे कृते 'लक्ष्ये लक्षणस्य' इति न्यायेन न पुनर्ह्रस्वः। तदुक्तम। 'इको झल'(1-2-9) इति सूत्रे भाष्ये - 'कृतकारि खल्वपि शास्त्रं पर्जन्यवदि'ति। सिद्धेऽपि ह्रस्वादिकारीत्यर्थः।

न च लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरित्यत्र न मानमिति वाच्यम,। 'समो वा लोपमेके' इति लोपेनैकसकारस्य, द्वित्वेन द्विसकारस्य, पुनर्द्वित्वेन च त्रिसकारस्य सिद्धौ 'समः सुटि' (8-3-5) इति सूत्रस्यैव मानत्वात।'सम्प्रसारणाच्च' (6-1-108) 'सिचि वृद्धिः' (7-2-1) इत्यादौ भाष्ये स्पष्टमुक्तात्वाच्च।

अत्र विकारकृतो लक्ष्यभेदो न इति 'सिचि वृद्धिः' इति भाष्यात।प्रतीयत इत्यन्यत्र विस्तरः॥120॥

ननु 'स्यन्दूधातोः' 'स्यन्त्स्यती'त्यादावात्मनेपदनिमित्तत्वाभावनिमित्तत्वाच्च 'न वृद्भ्यश्चतुर्भ्यः' (7-2-59) इति निषेधस्य बहिरङ्गत्वैन अन्तरङ्गत्वादूदिल्लक्षणस्येड्विकल्पस्यापत्तिरत आह-

निषेधाश्च बलीयांस॥121॥

अन्तरङ्गादुपजीव्यादपि बलीयांस इत्यर्थः।

'चतुर्भ्यः' इति तु स्पष्टार्थमेव। अत एव तत्प्रत्याख्यानं भाष्योक्तं सङ्गच्छते।

अत एव सवर्णसंज्ञादेर्निषेधविषये न विकल्पः। अन्यथा मीमांसकरीत्या विधेरुपजीव्यत्वेन प्राबल्यात्तस्य सर्वथा बाधानुपपत्त्या दुर्वारः स इति मञ्जूषायां विस्तरः।

अत एव 'द्वन्द्वे च' (1-1-31) 'विभाषा जसि' (1-1-32) इति चरितार्थम।

विध्युन्मूलनाय प्रवृत्तिरस्या बीजम। 'न लुमता' (1-1-63) 'कर्मेर्णिङ्' (3-1-30) इत्यनयोर्भाष्ये स्पष्टैषा॥121॥

ननु अत्यन्तस्वार्थिकानामर्थप्रत्यायकत्वरूपप्रत्ययत्वानुपपत्तिरत आह-

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे॥122॥

यस्यार्थः प्रकृत्या प्रत्याय्यते सोऽपि प्रत्यय इत्यस्याप्यङ्गीकारात्तस्य प्रत्ययत्वमिति न दोषः। स्वार्थ इत्यस्य स्वीयप्रकृत्यर्थ इत्यर्थः।

महासंज्ञाबलादर्थाकाङ्क्षायामन्यानुपस्थितिरस्या बीजम। 'सुपि स्थः' (3-2-4) इत्यादिसूत्रेषु भाष्ये स्पष्टैषा॥122॥

योगविभागादिष्टसिद्धिः॥123॥

इष्टसिद्धिरेव न त्वनिष्टापादनं कार्यमित्यर्थः। तत्तत्समानविधिकद्वितीययोगेन विभक्तस्यानित्यत्वज्ञापनमेतद्बीजम॥123॥

पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते॥124॥

तत्र तत्रान्यतरस्यां विभाषा वेति सूत्रनिर्देशज्ञापितमिदम॥124॥

ज्ञापकसिद्धं न सर्वत्र॥125॥

स्पष्टमेव पठितव्येऽनुमानाद् बोधनमसार्वत्रिकत्वार्थमित्यर्थः। तेन ज्ञापकसिद्धपरिभाषयानिष्टं नापदनीयमिति तात्पर्यम। भाष्येऽपि ध्वनितमेतत। याप्सूत्रादौ।

ज्ञापकेति न्यायस्याप्युपलक्षणम। न्यायज्ञापकसिद्धानामपि केषाञ्चित। कथनमन्येषामनित्यत्वबोधनायेति भावः। यथा 'तत्स्थानापन्ने तद्धर्मलाभ' इति न्यायसिद्धं स्थानिवत्सूत्रम ज्ञापकसिद्धं च तत्र 'अनल्विधावि'ति॥125॥

ननु 'द्रोग्धा द्रोढा द्रोढे'त्यादौ घत्वादीनामसिद्धत्वात पूर्वं द्वित्वे एकत्र घत्वमपरत्र ढत्वमित्यस्याप्यापत्तिरत आह-

पूर्वत्रासिद्धीयमद्वित्वे॥126॥

द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परमसिद्धमित्यर्थः। 'पूर्वत्रासिद्धम'(8-2-1) इत्यधिकारभवं शास्त्रमस्या लिङ्गम।

यत्र च सिद्धत्वासिद्धत्वयोः फले विशेषस्तत्रैवेयम। 'कृष्णर्द्धिरि'त्यादौ जश्त्वात्पूर्वमनन्तरं वा द्वित्वे रूपे विशेषाभावेन नास्याः प्रवृत्तिरित्यन्यत्र विस्तरः। 'सर्वस्य द्वे' (8-1-1) इति सूत्रे भाष्ये स्पष्टेयम॥126॥

ननु 'गोष्वश्वेषु च स्वामी'त्यादिवद् 'गोष्वश्वानां च स्वामी'त्यपि स्यात स्वामीश्वर' (2-3-39) इति सूत्रेण षष्ठीसप्तम्योर्विधानादत आह-

एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति॥127॥

यत्रान्याकृतिकरणे भिन्नार्थत्वसम्भावना तद्विषयोऽयं न्याय इत्यन्यत्र विस्तरः। 'कृञ्चानुप्रयुज्यते' (3-1-40) इति सूत्रे भाष्ये स्पष्टेयम॥127॥

ननु 'विव्याधे'त्यादौ परत्वाद् 'हलादिः शेषे' वस्य सम्प्रसारणं स्यादत आह-

सम्प्रसारणं तदाश्रयं च कार्यं बलवत॥128॥

तदाश्रयं सम्प्रसारणाच्च (6-1-10) इति पूर्वरूपम।

RSK.S. Bhopal Campus

वस्तुतो 'लिट्यभ्यासस्य' (6-1-17) इति सूत्रे उभयेषां ग्रहणस्योभयेषां सम्प्रसारणमेव यथा स्यादित्यर्थकत्वेनेदं सिद्धमित्येषा व्यर्थेति 'लिट्यभ्यासस्य' इति सूत्रे भाष्ये स्पष्टम□फलान्तरान्यथासिद्धिरपि तत्रैव भाष्ये स्पष्टा। 'णौ च संश्च□ोः' (6-1-31) इत्यादौ संश्च□ोरित्यादि विषयसप्तमीति तत्रापि न दोष इत्यन्यत्र विस्तरः॥128॥

क्वचिद्विकृतिः प्रकृतिं गृह्णाति॥129॥

तेन 'निसमुपविभ्यो ह्वः (1-3-30) इत्यत्र ह्वाग्रहणेन ह्वेञो ग्रहणसिद्धिः।

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम॥130॥

तेन 'दादेर्धातोः' (8-2-32) इत्यत्र औपदेशिकधातोरेव ग्रहणमिति। तन्न। तयोर्निर्मूलत्वाद्भाष्याव्यवहृतत्वाच्च। न च विकृतिः प्रकृतिं गृह्णातीति 'ग्रहिज्या' (6-1-16) इति सूत्रस्थभाष्येणाद्यायास्तिरस्काराच्च 'निसमुपविभ्यो ह्वः' इत्यादौ ह्वेञोऽनुकरणे सौत्रः प्रयोगः।

आत्वविषय एवात्मनेपदं प्रयोगस्थानामेवानुकरणस्य घुसंज्ञासूत्रे भाष्ये स्पष्टमुक्तत्वादित्यन्ये।

अन्त्यापि तत्रोपदेशग्रहणं कुर्वतः सूत्रकृतो वार्तिककृतश्चासम्मता। ''इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्र अस्यैतद्रूपमिति। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम□अस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते, क उपदेशो नामे''ति घुसंज्ञासूत्रस्थभाष्येण प्रायोगिकासम्भवे तद्ग्रहणमित्यर्थस्य लाभेन भाष्यासम्मता च।

भाष्ये सानुबन्धकेत्यादि प्रकृताभिप्रायेण। दादेः इति सूत्रे दादिपदस्यौपदेशिकदादित्ववति लक्षणेति न दोष इत्यन्यत्र विस्तरः॥129-130॥

यदपि ननु 'अजर्घा, बेभिदीती'त्यादौ तत्तद्गणप्रयुक्ता विकरणा यङ्लुकि स्युः, तथा यङ्लुकि 'बेभेदिते'त्यादौ 'एकाचः' (7-2-10) इती इण्निषेधः स्यादत आह-

श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।

यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥131॥

अनुबन्धनिर्देशो द्विधा- स्वरूपेण '□ित' इत्यादिपदेन च। 'हन्ति, याति, वाति' 'सनीवन्त' (7-2-49) इति सूत्रे 'भरे'ति, 'दी□ो युडचि' (6-4-63), 'अनुदात्त□ितः' (1-3-12), 'दिवादिभ्यः श्यन'□(3-1-69), 'एकाच उपदेशे' (7-2-10), इत्युदाहरणानि।

द्वित्वं 'सनाद्यन्ताः' (3-1-32) इति 'भूवादयः' (1-3-1) इति च धातुत्वं भवत्येव, 'गुणो य□लुकोः' (7-4-82) इत्यादिभिर्निषेधानित्यत्वकल्पनात□तेन भष्भावोऽप्यजर्घा' इत्यादौ भवति। अत एव 'श्वीदितः' (7-2-14) इति सूत्रे कैयटे 'यत्रैकाज्ग्रहणं किञ्चिदि'ति पाठः।

R.S.K. Bhopal Campus

'एकाच उपदेशेऽनुदात्तात्'(7-2-10) इति सूत्रे एकाज्ग्रहणेनैकदेशानुमत्यैषा ज्ञाप्यते। अन्यथोपदेऽनेकाचामुदात्तत्वस्यैव सत्त्वेन तद्वैयर्थ्यं स्पष्टमेवेति। तदपि न, भाष्यानुक्तत्वात्,एकाज्ग्रहणस्य वधिव्यावृत्त्यर्थमावश्यकत्वाच्च। न च वधिस्थान्युपदेश एकाजेवेति वाच्यम्, साक्षादुपदेशसम्भवेनैतद्विषये स्थान्युपदेशाग्रहणादुपदेशत्वावच्छेदेनैकाजित्यर्थाच्च। किञ्च उत्तरार्थमेकाज्ग्रहणम्। अत एव 'जागरितवानि'त्यादावुपदेश उगन्तत्वमादाय 'श्नुकः किति' (7-2-11) इतीण्निषेधो न। तत्रोपदेश इत्युनुवृतिश्च स्तीर्णमित्यादाविण्निषेधायेत्याकरे स्पष्टम्।

न च भाष्ये यङ्लोपे 'बेभिदिते'त्यादाविट्प्रवृत्त्यर्थम्। उपदेशेऽनुदात्तादेकाचः श्रूयमाणादङ्गादित्यर्थे सनीट्प्रतिषेधो वक्तव्यः, बिभित्सतीति दोषोपन्यासवद्यङ्लुकि दोषानुपन्यासेन तत्रेडिष्टः, यङ्लोपेत्यादिभाष्यं तूपक्रमोपसंहारबलेन न यङ्लुग्विषयम्। किञ्च तस्य तद्विषयकत्वे यङ्लोपे स्थानिवत्त्वस्येव यङ्लुक्युपायाप्रदर्शनेन न्यूनतापत्तिरिति वाच्यम्। इड्विषये यङ्लुको लोकेऽनभिधानेन छन्दसि सर्वविधीनां वैकल्पिकत्वेन च तत्र दोषानुपन्यासेनादोषात्। अन्यथा 'एकाज्ग्रहणं किमर्थमि'ति प्रश्नस्य 'उत्तरत्र जागर्त्यर्थमिह च वध्यर्थमि'त्युत्तरस्य च भाष्ये निरालम्बनत्वापत्तेः।

न च आर्धधातुकाक्षिसधातोरेकाच इति विशेषणम्। एवं च 'बिभित्सती'त्यादावुत्तरखण्डस्य धातोरेकाच्त्वमस्त्येवोत्तरखण्डेऽस्तित्ववत्। एतच्च 'दयतेः'(7-4-9) इति सूत्रे भाष्ये स्पष्टम्।एवं च प्रकृतभाष्यासङ्गतिरिति वाच्यम्।आक्षेपे आक्षिसस्यान्वये च मानाभावात्।अङ्गत्वं तु विशिष्ट एवेति 'एकाचो द्वे' (6-1-1) इति सूत्रे भाष्ये स्पष्टम्। निरूपितं च तनादिशेषे शब्देन्दुशेखरे। धातुत्वं तूत्तरखण्ड एव। अत एव 'एकाचो बशो भष्'(8-2-37) इति सूत्रे धातोरवयवस्यैकाच इति वैयधिकरण्येनान्वये 'गर्धप'सिद्धिः प्रयोजनमुक्तं भाष्ये, न तु प्रसिद्धम्।अजर्घा' इति।

'अजर्घा', बेभिदीतीत्यादौ श्नम्श्यनादयस्तु 'चर्करीतं चे'त्यस्यादादौ पाठेन यङ्लुगन्ते गणान्तरप्रयुक्तविकरणस्याप्राप्तया न भवन्ति।

छान्दसत्वादेव कार्यान्तरणामपि छन्दसि दृष्टप्रयोगेष्वदृष्टानामभावो बोध्यः। भाषायां तु तादृशानामभाव एव। शिप्शबादिनिर्देशास्तु 'भवतेरः' (7-4-73) इत्यादिसूत्रस्थतन्निर्देशवन्नार्थसाधका इत्यन्यत्र विस्तरः॥131॥

ननु 'जभोऽचि' 'रधेश्च' 'नेट्यलिटी'त्येव सूत्र्यतां किं द्वीरधिग्रहणेनेत्यत आह-

पदगौरवाद्योगविभागो गरियान्॥132॥

प्रतिवाक्यं भिन्नवाक्यार्थबोधकल्पनेन गौरवं स्पष्टमेव। परन्तु भाष्यासम्म्तेयम्। 'टाऽसि' (7-1-12) इति सूत्रस्थभाष्यविरुद्धा च।

तत्र च इनादेशे इकारप्रत्याख्यानं योगविभागेनैव कृतिमिति बहवः॥132॥

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः॥133॥

'एओङ्' 'एऔच्' सूत्रयोर्ध्वनितैषा भाष्ये। तत्रानेकपदघटितसूत्रे प्रायेण पदलाघवविचार एव, न तु मात्रालाघवविचार इति 'ऊकालोऽच्'(1-2-27) 'अपृक्त एकाल्' (1-2-41) इत्यादिसूत्रेषु भाष्ये ध्वनितम्।तत्र हि सूत्रे ''अल्ग्रहणहल्ग्रहणयोर्विशेषविचारे संज्ञायां हल्ग्रहणं 'ण्यक्षत्रिया' (2-4-58) इति सूत्रेऽणिञोरिति वाच्यमिति त्रीणि पदान्यल्ग्रहणे, तदेकं स्वादिलोपे हल्ग्रहणं ण्येति सूत्रेऽणिञोरिति न वाच्यमपृक्तस्येति वाच्यमिति त्रीण्येव पदानीति नास्ति लाघवकृतो विशेष'' इत्युक्तम्।

'अचि श्नु' (6-4-77) इति सूत्रे इण इत्येव सिद्धे य्वोरिति संमृद्य ग्रहणान्न पूर्वेणेण्ग्रहणम्।तत्र विभक्तिनिर्देशे संमृद्य ग्रहणे च सार्धास्तिस्त्रो मात्रा इण्।ग्रहणे तिस्रा मात्रा इति लण्सूत्रे भाष्योक्तेः। तथा 'ओतःश्यनि' (7-3-71) इति सूत्रे शितीति न वक्तव्यम्। तत्राप्ययमर्थः - 'ष्ठिवुक्लमु' (7-3-75) इति सूत्रे शितीति न कर्तव्यं भवतीति भाष्ये न केवलं मात्रालाघवं यावदयमप्यर्थं इति कैयटोक्तेः प्रायेणेति शिवम्॥133॥

इति शास्त्रशेषनामकं तृतीयं प्रकरणम्॥

इति श्रीमन्महामहोपाध्याय-शिवभट्ट-सतीगर्भजनागोजीभट्टकृतः परिभाषेन्दुशेखरः

❖ ❖ ❖ ❖ ❖

R.S.K.S. Bhopal Campus